# ऋग्वेद मण्डल ३

(२३५)
सोम॑स्य मा त॒वसं॒ वक्ष्य् अ॑ग्ने॒ वह्निं॑ चकर्थ वि॒दथे॒ यज॑ध्यै ।
दे॒वाँ अच्छा॒ दीद्य॑द् यु॒ञ्जे अद्रिं॑ शमा॒ये अ॑ग्ने त॒न्वं॑ जुषस्व ॥ ३ ००१ ०१
प्राञ्चं॑ य॒ज्ञं च॑कृम॒ वर्ध॑तां॒ गीः स॒मिद्भि॑र् अ॒ग्निं नम॑सा दुवस्यन् ।
दि॒वः श॑शासुर् वि॒दथा॑ कवी॒नां गृत्सा॑य चित् त॒वसे॑ गा॒तुम् ई॑षुः ॥ ३ ००१ ०२
मयो॑ दधे मे॒धिरः॑ पू॒तद॑क्षो दि॒वः सु॒बन्धु॑र् ज॒नुषा॑ पृथि॒व्याः ।
अवि॑न्दन्न् उ दर्श॒तम् अ॒प्स्व् अ॒१॒न्तर् दे॒वासो॑ अ॒ग्निम् अ॒पसि॒ स्वसॄ॑णाम् ॥ ३ ००१ ०३
अव॑र्धयन् सु॒भगं॑ स॒प्त य॒ह्वीः श्वे॒तं ज॑ज्ञा॒नम् अ॑रु॒षम् म॑हि॒त्वा ।
शिशुं॒ न जा॒तम् अ॒भ्य् आ॑रु॒र् अश्वा॑ दे॒वासो॑ अ॒ग्निं जनि॑मन् वपुष्यन् ॥ ३ ००१ ०४
शु॒क्रेभि॒र् अङ्गै॒ रज॑ आतत॒न्वान् क्रतुं॑ पुना॒नः क॒विभिः॑ प॒वित्रैः॑ ।
शो॒चिर् वसा॑नः॒ पर्य् आयु॑र् अ॒पां श्रियो॑ मिमीते बृह॒तीर् अनू॑नाः ॥ ३ ००१ ०५
व॒व्राजा॑ सी॒म् अन॑दती॒र् अद॑ब्धा दि॒वो य॒ह्वीर् अव॑साना॒ अन॑ग्नाः ।
सना॒ अत्र॑ युव॒तयः॒ सयो॑नी॒र् एकं॒ गर्भं॑ दधिरे स॒प्त वाणीः॑ ॥ ३ ००१ ०६
स्ती॒र्णा अ॑स्य सं॒हतो॑ वि॒श्वरू॑पा घृ॒तस्य॒ योनौ॑ स्र॒वथे॒ मधू॑नाम् ।
अस्थु॒र् अत्र॑ धे॒नवः॒ पिन्व॑माना म॒ही द॒स्मस्य॑ मा॒तरा॑ समी॒ची ॥ ३ ००१ ०७
ब॒भ्रा॒णः सू॑नो सहसो॒ व्य् अ॑द्यौ॒द् दधा॑नः शु॒क्रा र॑भ॒सा वपूं॑षि ।
श्चोत॑न्ति॒ धारा॒ मधु॑नो घृ॒तस्य॒ वृषा॒ यत्र॑ वावृ॒धे काव्ये॑न ॥ ३ ००१ ०८
पि॒तुश् चि॒द् ऊध॑र् ज॒नुषा॑ विवेद॒ व्य् अ॑स्य॒ धारा॑ असृज॒द् वि धेनाः॑ ।
गुहा॒ चर॑न्तं॒ सखि॑भिः शि॒वेभि॑र् दि॒वो य॒ह्वीभि॒र् न गुहा॑ बभूव ॥ ३ ००१ ०९
पि॒तुश् च॒ गर्भं॑ जनि॒तुश् च॑ बभ्रे पू॒र्वीर् एको॑ अधय॒त् पीप्या॑नाः ।
वृष्णे॑ स॒पत्नी॒ शुच॑ये॒ सब॑न्धू उ॒भे अ॑स्मै मनु॒ष्ये॒३॒ नि पा॑हि ॥ ३ ००१ १०
उ॒रौ म॒हाँ अ॑निबा॒धे व॑व॒र्धापो॑ अ॒ग्निं य॒शसः॒ सं हि पू॒र्वीः ।
ऋ॒तस्य॒ योना॑व् अशय॒द् दमू॑ना जामी॒नाम् अ॒ग्निर् अ॒पसि॒ स्वसॄ॑णाम् ॥ ३ ००१ ११
अ॒क्रो न ब॒भ्रिः स॑मि॒थे म॒हीनां॑ दिदृ॒क्षेयः॑ सू॒नवे॒ भाऋ॑जीकः ।
उद् उ॒स्रिया॒ जनि॑ता॒ यो ज॒जाना॒पां गर्भो॒ नृत॑मो य॒ह्वो अ॒ग्निः ॥ ३ ००१ १२
अ॒पां गर्भं॑ दर्श॒तम् ओष॑धीनां॒ वना॑ जजान सु॒भगा॒ विरू॑पम् ।
दे॒वास॑श् चि॒न् मन॑सा॒ सं हि ज॒ग्मुः पनि॑ष्ठं जा॒तं त॒वसं॑ दुवस्यन् ॥ ३ ००१ १३

बृहन्त इद् भानवो भाऋजीकम् अग्निं सचन्त विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अन्तर् अपार ऊर्वे अमृतं दुहानाः ॥ ३ ००१ १४
ईळे च त्वा यजमानो हविर्भिर् ईळे सखित्वं सुमतिं निकामः ।
देवैर् अवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिर् अनीकैः ॥ ३ ००१ १५
उपक्षेतारस् तव सुप्रणीते ऽग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुञ्जमाना अभि ष्याम पृतनायूँर् अदेवान् ॥ ३ ००१ १६
आ देवानाम् अभवः केतुर् अग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्ताँ अवासयो दमूना अनु देवान् रथिरो यासि साधन् ॥ ३ ००१ १७
नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।
घृतप्रतीक उर्विया व्य् अद्यौद् अग्निर् विश्वानि काव्यानि विद्वान् ॥ ३ ००१ १८
आ नो गहि सख्येभिः शिवेभिर् महान् महीभिर् ऊतिभिः सरण्यन् ।
अस्मे रयिम् बहुलं संतरुत्रं सुवाचम् भागं यशसं कृधी नः ॥ ३ ००१ १९
एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचम् ।
महान्ति वृष्णे सवना कृतेमा जन्मञ्-जन्मन् निहितो जातवेदाः ॥ ३ ००१ २०
जन्मञ्-जन्मन् निहितो जातवेदा विश्वामित्रेभिर् इध्यते अजस्रः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ३ ००१ २१
इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो रराणः ।
प्र यंसि होतर् बृहतीर् इषो नो ऽग्ने महि द्रविणम् आ यजस्व ॥ ३ ००१ २२
इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ३ ००१ २३

(२३६)
वैश्वानराय धिषणाम् ऋतावृधे घृतं न पूतम् अग्नये जनामसि ।
द्विता होतारम् मनुषश् च वाघतो धिया रथं न कुलिशः सम् ऋण्वति ॥ ३ ००२ ०१
स रोचयज् जनुषा रोदसी उभे स मात्रोर् अभवत् पुत्र ईड्यः ।
हव्यवाळ् अग्निर् अजरश् चनोहितो दूळभो विशाम् अतिथिर् विभावसुः ॥ ३ ००२ ०२
क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः ।

रुरुचानम् भानुना ज्योतिषा महाम् अत्यं न वाजं सनिष्यन्न् उप ब्रुवे ॥ ३ ००२ ०३
आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्रयं वाजम् ऋग्मियम् ।
रातिम् भृगूणाम् उशिजं कविक्रतुम् अग्निं राजन्तं दिव्येन शोचिषा ॥ ३ ००२ ०४
अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसम् इह वृक्तबर्हिषः ।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिम् अपसाम् ॥ ३ ००२ ०५
पावकशोचे तव हि क्षयम् परि होतर् यज्ञेषु वृक्तबर्हिषो नरः ।
अग्ने दुव इच्छमानास आप्यम् उपासते द्रविणं धेहि तेभ्यः ॥ ३ ००२ ०६
आ रोदसी अपृणद् आ स्वर् महज् जातं यद् एनम् अपसो अधारयन् ।
सो अध्वराय परि णीयते कविर् अत्यो न वाजसातये चनोहितः ॥ ३ ००२ ०७
नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।
रथीर् ऋतस्य बृहतो विचर्षणिर् अग्निर् देवानाम् अभवत् पुरोहितः ॥ ३ ००२ ०८
तिस्रो यह्वस्य समिधः परिज्मनो ऽग्नेर् अपुनन्न् उशिजो अमृत्यवः ।
तासाम् एकाम् अदधुर् मर्त्ये भुजम् उ लोकम् उ द्वे उप जामिम् ईयतुः ॥ ३ ००२ ०९
विशां कविं विश्पतिम् मानुषीर् इषः सं सीम् अकृण्वन् स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत् स गर्भम् एषु भुवनेषु दीधरत् ॥ ३ ००२ १०
स जिन्वते जठरेषु प्रजज्ञिवान् वृषा चित्रेषु नानदन् न सिंहः ।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥ ३ ००२ ११
वैश्वानरः प्रत्नथा नाकम् आरुहद् दिवस् पृष्ठम् भन्दमानः सुमन्मभिः ।
स पूर्ववज् जनयञ् जन्तवे धनं समानम् अज्मम् पर्य् एति जागृविः ॥ ३ ००२ १२
ऋतावानं यज्ञियं विप्रम् उक्थ्य १ म् आ यं दधे मातरिश्वा दिवि क्षयम् ।
तं चित्रयामं हरिकेशम् ईमहे सुदीतिम् अग्निं सुविताय नव्यसे ॥ ३ ००२ १३
शुचिं न यामन्न् इषिरं स्वर्दृशं केतुं दिवो रोचनस्थाम् उषर्बुधम् ।
अग्निम् मूर्धानं दिवो अप्रतिष्कुतं तम् ईमहे नमसा वाजिनम् बृहत् ॥ ३ ००२ १४
मन्द्रं होतारं शुचिम् अद्वयाविनं दमूनसम् उक्थ्यं विश्वचर्षणिम् ।
रथं न चित्रं वपुषाय दर्शतम् मनुर्हितं सदम् इद् राय ईमहे ॥ ३ ००२ १५

(२३७)

वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर् हि देवाँ अमृतो दुवस्यत्य् अथा धर्माणि सनता न दूदुषत् ॥ ३ ००३ ०१
अन्तर् दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयम् बृहन्तम् परि भूषति द्युभिर् देवेभिर् अग्निर् इषितो धियावसुः ॥ ३ ००३ ०२
केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निम् महयन्त चित्तिभिः ।
अपांसि यस्मिन्न् अधि संदधुर् गिरस् तस्मिन् सुम्नानि यजमान आ चके ॥ ३ ००३ ०३
पिता यज्ञानाम् असुरो विपश्चितां विमानम् अग्निर् वयुनं च वाघताम् ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥ ३ ००३ ०४
चन्द्रम् अग्निं चन्द्ररथं हरिव्रतं वैश्वानरम् अप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिर् आवृतम् भूर्णिं देवास इह सुश्रियं दधुः ॥ ३ ००३ ०५
अग्निर् देवेभिर् मनुषश् च जन्तुभिस् तन्वानो यज्ञम् पुरुपेशसं धिया ।
रथीर् अन्तर् ईयते साधदिष्टिभिर् जीरो दमूना अभिशस्तिचातनः ॥ ३ ००३ ०६
अग्ने जरस्व स्वपत्य आयुन्य् ऊर्जा पिन्वस्व सम् इषो दिदीहि नः ।
वयांसि जिन्व बृहतश् च जागृव उशिग् देवानाम् असि सुक्रतुर् विपाम् ॥ ३ ००३ ०७
विश्पतिं यह्वम् अतिथिं नरः सदा यन्तारं धीनाम् उशिजं च वाघताम् ।
अध्वराणां चेतनं जातवेदसम् प्र शंसन्ति नमसा जूतिभिर् वृधे ॥ ३ ००३ ०८
विभावा देवः सुरणः परि क्षितीर् अग्निर् बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयम् उप भूषेम दम आ सुवृक्तिभिः ॥ ३ ००३ ०९
वैश्वानर तव धामान्य् आ चके येभिः स्वर्विद् अभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूर् असि त्मना ॥ ३ ००३ १०
वैश्वानरस्य दंसनाभ्यो बृहद् अरिणाद् एकः स्वपस्यया कविः ।
उभा पितरा महयन्न् अजायताग्निर् द्यावापृथिवी भूरिरेतसा ॥ ३ ००३ ११

(२३८)

समित्-समित् सुमना बोध्य् अस्मे शुचा-शुचा सुमतिं रासि वस्वः ।
आ देव देवान् यजथाय वक्षि सखा सखीन् सुमना यक्ष्य् अग्ने ॥ ३ ००४ ०१
यं देवासस् त्रिर् अहन्न् आयजन्ते दिवे-दिवे वरुणो मित्रो अग्निः ।

सेमं यज्ञम् मधुमन्तं कृधी नस् तनूनपाद् घृतयोनिं विधन्तम् ॥ ३ ००४ ०२
प्र दीधितिर् विश्ववारा जिगाति होतारम् इळः प्रथमं यजध्यै ।
अच्छा नमोभिर् वृषभं वन्दध्यै स देवान् यक्षद् इषितो यजीयान् ॥ ३ ००४ ०३
ऊर्ध्वो वां गातुर् अध्वरे अकार्य् ऊर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्य् असादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥ ३ ००४ ०४
सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वम् प्रति यन्न् ऋतेन ।
नृपेशसो विदथेषु प्र जाता अभी ३ मं यज्ञं वि चरन्त पूर्वीः ॥ ३ ००४ ०५
आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा ३ विरूपे ।
यथा नो मित्रो वरुणो जुजोषद् इन्द्रो मरुत्वाँ उत वा महोभिः ॥ ३ ००४ ०६
दैव्या होतारा प्रथमा न्य् ऋञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतम् इत् त आहुर् अनु व्रतं व्रतपा दीध्यानाः ॥ ३ ००४ ०७
आ भारती भारतीभिः सजोषा इळा देवैर् मनुष्येभिर् अग्निः ।
सरस्वती सारस्वतेभिर् अर्वाक् तिस्रो देवीर् बर्हिर् एदं सदन्तु ॥ ३ ००४ ०८
तन् नस् तुरीपम् अध पोषयित्नु देव त्वष्टर् वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ३ ००४ ०९
वनस्पते ऽव सृजोप देवान् अग्निर् हविः शमिता सूदयाति ।
सेद् उ होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ ३ ००४ १०
आ याह्य् अग्ने समिधानो अर्वाङ् इन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर् न आस्ताम् अदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥ ३ ००४ ११

(२३९)

प्रत्य् अग्निर् उषसश् चेकितानो ऽबोधि विप्रः पदवीः कवीनाम् ।
पृथुपाजा देवयद्भिः समिद्धो ऽप द्वारा तमसो वह्निर् आवः ॥ ३ ००५ ०१
प्रेद् व् अग्निर् वावृधे स्तोमेभिर् गीर्भि स्तोतॄणां नमस्य उक्थैः ।
पूर्वीर् ऋतस्य संदृशश् चकानः सं दूतो अद्यौद् उषसो विरोके ॥ ३ ००५ ०२
अधाय्य् अग्निर् मानुषीषु विक्ष्व् अ १ पां गर्भो मित्र ऋतेन साधन् ।
आ हर्यतो यजतः सान्व् अस्थाद् अभूद् उ विप्रो हव्यो मतीनाम् ॥ ३ ००५ ०३

मित्रो अग्निर् भवति यत् समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युर् इषिरो दमूना मित्रः सिन्धूनाम् उत पर्वतानाम् ॥ ३ ००५ ०४
पाति प्रियं रिपो अग्रम् पदं वेः पाति यह्वश् चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणम् अग्निः पाति देवानाम् उपमादम् ऋष्वः ॥ ३ ००५ ०५
ऋभुश् चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत् पदं वेस् तद् इद् अग्नी रक्षत्य् अप्रयुच्छन् ॥ ३ ००५ ०६
आ योनिम् अग्निर् घृतवन्तम् अस्थात् पृथुप्रगाणम् उशन्तम् उशानः ।
दीद्यानः शुचिर् ऋष्वः पावकः पुनः-पुनर् मातरा नव्यसी कः ॥ ३ ००५ ०७
सद्यो जात ओषधीभिर् ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आप इव प्रवता शुम्भमाना उरुष्यद् अग्निः पित्रोर् उपस्थे ॥ ३ ००५ ०८
उद् उ ष्टुतः समिधा यह्वो अद्यौद् वर्ष्मन् दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निर् ईड्यो मातरिश्वा दूतो वक्षद् यजथाय देवान् ॥ ३ ००५ ०९
उद् अस्तम्भीत् समिधा नाकम् ऋष्वो ऽग्निर् भवन्न् उत्तमो रोचनानाम् ।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥ ३ ००५ १०
इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ३ ००५ ११

(२४०)
प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड् वाजिनी प्राच्य् एति हविर् भरन्त्य् अग्नये घृताची ॥ ३ ००६ ०१
आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश् चिद् अग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥ ३ ००६ ०२
द्यौश् च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।
यदी विशो मानुषीर् देवयन्तीः प्रयस्वतीर् ईळते शुक्रम् अर्चिः ॥ ३ ००६ ०३
महान् सधस्थे ध्रुव आ निषत्तो ऽन्तर् द्यावा माहिने हर्यमाणः ।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥ ३ ००६ ०४
व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।

त्वं दूतो अभवो जायमानस् त्वं नेता वृषभ चर्षणीनाम् ॥ ३ ००६ ०५
ऋतस्य वा केशिना योग्याभिर् घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान् देव विश्वान् स्वध्वरा कृणुहि जातवेदः ॥ ३ ००६ ०६
दिवश् चिद् आ ते रुचयन्त रोका उषो विभातीर् अनु भासि पूर्वीः ।
अपो यद् अग्न उशधग् वनेषु होतुर् मन्द्रस्य पनयन्त देवाः ॥ ३ ००६ ०७
उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥ ३ ००६ ०८
ऐभिर् अग्ने सरथं याह्य् अर्वाङ् नानारथं वा विभवो ह्य् अश्वाः ।
पत्नीवतस् त्रिंशतं त्रींश् च देवान् अनुष्वधम् आ वह मादयस्व ॥ ३ ००६ ०९
स होता यस्य रोदसी चिद् उर्वी यज्ञं-यज्ञम् अभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥ ३ ००६ १०
इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ३ ००६ ११

(२४१)
प्र य आरुः शितिपृष्ठस्य धासेर् आ मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घम् आयुः प्रयक्षे ॥ ३ ००७ ०१
दिवक्षसो धेनवो वृष्णो अश्वा देवीर् आ तस्थौ मधुमद् वहन्तीः ।
ऋतस्य त्वा सदसि क्षेमयन्तम् पर्य् एका चरति वर्तनिं गौः ॥ ३ ००७ ०२
आ सीम् अरोहत् सुयमा भवन्तीः पतिश् चिकित्वान् रयिविद् रयीणाम् ।
प्र नीलपृष्ठो अतसस्य धासेस् ता अवासयत् पुरुधप्रतीकः ॥ ३ ००७ ०३
महि त्वाष्ट्रम् ऊर्जयन्तीर् अजुर्यं स्तभूयमानं वहतो वहन्ति ।
व्य् अङ्गेभिर् दिद्युतानः सधस्थ एकाम् इव रोदसी आ विवेश ॥ ३ ००७ ०४
जानन्ति वृष्णो अरुषस्य शेवम् उत ब्रध्नस्य शासने रणन्ति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥ ३ ००७ ०५
उतो पितृभ्याम् प्रविदानु घोषम् महो महद्भ्याम् अनयन्त शूषम् ।
उक्षा ह यत्र परि धानम् अक्तोर् अनु स्वं धाम जरितुर् ववक्ष ॥ ३ ००७ ०६

अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितम् पदं वेः ।
प्राञ्चो मदन्त्य् उक्षणो अजुर्या देवा देवानाम् अनु हि व्रता गुः ॥ ३ ००७ ०७
दैव्या होतारा प्रथमा न्य् ऋञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतम् इत् त आहुर् अनु व्रतं व्रतपा दीध्यानाः ॥ ३ ००७ ०८
वृषायन्ते महे अत्याय पूर्वीर् वृष्णे चित्राय रश्मयः सुयामाः ।
देव होतर् मन्द्रतरश् चिकित्वान् महो देवान् रोदसी एह वक्षि ॥ ३ ००७ ०९
पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवद् ऊषुः ।
उतो चिद् अग्ने महिना पृथिव्याः कृतं चिद् एनः सम् महे दशस्य ॥ ३ ००७ १०
इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ३ ००७ ११

(२४२)
अञ्जन्ति त्वाम् अध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यद् ऊर्ध्वस् तिष्ठा द्रविणेह धत्ताद् यद् वा क्षयो मातुर् अस्या उपस्थे ॥ ३ ००८ ०१
समिद्धस्य श्रयमाणः पुरस्ताद् ब्रह्म वन्वानो अजरं सुवीरम् ।
आरे अस्मद् अमतिम् बाधमान उच् छ्रयस्व महते सौभगाय ॥ ३ ००८ ०२
उच् छ्रयस्व वनस्पते वर्ष्मन् पृथिव्या अधि ।
सुमिती मीयमानो वर्चो धा यज्ञवाहसे ॥ ३ ००८ ०३
युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन् नयन्ति स्वाध्यो ३ मनसा देवयन्तः ॥ ३ ००८ ०४
जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उद् इयर्ति वाचम् ॥ ३ ००८ ०५
यान् वो नरो देवयन्तो निमिम्युर् वनस्पते स्वधितिर् वा ततक्ष ।
ते देवासः स्वरवस् तस्थिवांसः प्रजावद् अस्मे दिधिषन्तु रत्नम् ॥ ३ ००८ ०६
ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ।
ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ॥ ३ ००८ ०७
आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।

सजोषसो यज्ञम् अवन्तु देवा ऊर्ध्वं कृण्वन्त्व् अध्वरस्य केतुम् ॥ ३ ००८ ०८
हंसा इव श्रेणिशो यताना: शुक्रा वसाना: स्वरवो न आगु: ।
उन्नीयमाना: कविभि: पुरस्ताद् देवा देवानाम् अपि यन्ति पाथ: ॥ ३ ००८ ०९
शृङ्गाणीवेच् छृङ्गिणां सं ददृश्रे चषालवन्त: स्वरव: पृथिव्याम् ।
वाघद्भिर् वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ॥ ३ ००८ १०
वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।
यं त्वाम् अयं स्वधितिस् तेजमान: प्रणिनाय महते सौभगाय ॥ ३ ००८ ११

(२४३)
सखायस् त्वा ववृमहे देवम् मर्तास ऊतये ।
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिम् अनेहसम् ॥ ३ ००९ ०१
कायमानो वना त्वं यन् मातॄर् अजगन्न् अप: ।
न तत् ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्न् इहाभव: ॥ ३ ००९ ०२
अति तृष्टं ववक्षिथाथैव सुमना असि ।
प्र-प्रान्ये यन्ति पर्य् अन्य आसते येषां सख्ये असि श्रित: ॥ ३ ००९ ०३
ईयिवांसम् अति स्रिध: शश्वतीर् अति सश्चत: ।
अन्व् ईम् अविन्दन् निचिरासो अद्रुहो ऽप्सु सिंहम् इव श्रितम् ॥ ३ ००९ ०४
ससृवांसम् इव त्मनाग्निम् इत्था तिरोहितम् ।
ऐनं नयन् मातरिश्वा परावतो देवेभ्यो मथितम् परि ॥ ३ ००९ ०५
तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन ।
विश्वान् यद् यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥ ३ ००९ ०६
तद् भद्रं तव दंसना पाकाय चिच् छदयति ।
त्वां यद् अग्ने पशव: समासते समिद्धम् अपिशर्वरे ॥ ३ ००९ ०७
आ जुहोता स्वध्वरं शीरम् पावकशोचिषम् ।
आशुं दूतम् अजिरम् प्रत्नम् ईड्यं श्रुष्टी देवं सपर्यत ॥ ३ ००९ ०८
त्रीणि शता त्री सहस्राण्य् अग्निं त्रिंशच् च देवा नव चासपर्यन् ।
औक्षन् घृतैर् अस्तृणन् बर्हिर् अस्मा आद् इद् धोतारं न्य् असादयन्त ॥ ३ ००९ ०९

(२४४)
त्वाम् अग्ने मनीषिणः सम्राजं चर्षणीनाम् ।
देवम् मर्तास इन्धते सम् अध्वरे ॥ ३ ०१० ०१
त्वां यज्ञेष्व् ऋत्विजम् अग्ने होतारम् ईळते ।
गोपा ऋतस्य दीदिहि स्वे दमे ॥ ३ ०१० ०२
स घा यस् ते ददाशति समिधा जातवेदसे ।
सो अग्ने धत्ते सुवीर्यं स पुष्यति ॥ ३ ०१० ०३
स केतुर् अध्वराणाम् अग्निर् देवेभिर् आ गमत् ।
अञ्जानः सप्त होतृभिर् हविष्मते ॥ ३ ०१० ०४
प्र होत्रे पूर्व्यं वचो ऽग्नये भरता बृहत् ।
विपां ज्योतींषि बिभ्रते न वेधसे ॥ ३ ०१० ०५
अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः ।
महे वाजाय द्रविणाय दर्शतः ॥ ३ ०१० ०६
अग्ने यजिष्ठो अध्वरे देवान् देवयते यज ।
होता मन्द्रो वि राजस्य् अति स्रिधः ॥ ३ ०१० ०७
स नः पावक दीदिहि द्युमद् अस्मे सुवीर्यम् ।
भवा स्तोतृभ्यो अन्तमः स्वस्तये ॥ ३ ०१० ०८
तं त्वा विप्रा विपन्यवो जागृवांसः सम् इन्धते ।
हव्यवाहम् अमर्त्यं सहोवृधम् ॥ ३ ०१० ०९

(२४५)
अग्निर् होता पुरोहितो ऽध्वरस्य विचर्षणिः ।
स वेद यज्ञम् आनुषक् ॥ ३ ०११ ०१
स हव्यवाळ् अमर्त्य उशिग् दूतश् चनोहितः ।
अग्निर् धिया सम् ऋण्वति ॥ ३ ०११ ०२

अ॒ग्निर् धि॒या स चे॑तति के॒तुर् य॒ज्ञस्य॑ पू॒र्व्यः ।
अर्थं॒ ह्य् अस्य त॒रणि॑ ॥ ३ ०११ ०३
अ॒ग्निं सू॒नुं सन॑श्रुतं॒ सह॑सो जा॒तवे॑दसम् ।
वह्निं॑ दे॒वा अ॑कृण्वत ॥ ३ ०११ ०४
अदा॑भ्यः पुरए॒ता वि॒शाम् अ॒ग्निर् मानु॑षीणाम् ।
तूर्णी॒ रथ॒ः सदा॒ नव॑ः ॥ ३ ०११ ०५
सा॒ह्वान् विश्वा॑ अभि॒युज॒ः क्रतु॑र् दे॒वाना॒म् अमृ॑क्तः ।
अ॒ग्निस् तु॒विश्र॑वस्तमः ॥ ३ ०११ ०६
अ॒भि प्रयां॑सि॒ वाह॑सा दा॒श्वाँ अ॑श्नोति॒ मर्त्य॑ः ।
क्षयं॑म् पाव॒कशो॑चिषः ॥ ३ ०११ ०७
परि॒ विश्वा॑नि॒ सुधि॑ता॒ग्नेर् अ॑श्याम॒ मन्म॑भिः ।
विप्रा॑सो जा॒तवे॑दसः ॥ ३ ०११ ०८
अग्ने॒ विश्वा॑नि॒ वार्या॒ वाजे॑षु सनिषामहे ।
त्वे दे॒वास॒ एरि॑रे ॥ ३ ०११ ०९

(२४६)
इन्द्रा॑ग्नी॒ आ ग॑तं सु॒तं गी॒र्भिर् नभो॒ वरे॑ण्यम् ।
अ॒स्य पा॑तं धि॒येषि॒ता ॥ ३ ०१२ ०१
इन्द्रा॑ग्नी जरि॒तुः सचा॑ य॒ज्ञो जिगा॑ति॒ चेत॑नः ।
अ॒या पा॑तम् इ॒मं सु॒तम् ॥ ३ ०१२ ०२
इन्द्र॑म् अ॒ग्निं क॑वि॒च्छदा॑ य॒ज्ञस्य॑ जू॒त्या वृ॑णे ।
ता सोम॑स्ये॒ह तृ॑म्पताम् ॥ ३ ०१२ ०३
तो॒शा वृ॑त्र॒हणा॑ हुवे स॒जित्वा॒नाप॑राजिता ।
इ॒न्द्रा॒ग्नी वा॑जसा॒त॑मा ॥ ३ ०१२ ०४
प्र वा॑म् अर्चन्त्य् उ॒क्थिनो॑ नीथा॒विदो॑ जरि॒तार॑ः ।
इन्द्रा॑ग्नी॒ इष॒ आ वृ॑णे ॥ ३ ०१२ ०५
इन्द्रा॑ग्नी न॒वतिम् पुरो॑ दा॒सप॑त्नीर् अधूनुतम् ।

साकम् एकेन कर्मणा ॥ ३ ०१२ ०६
इन्द्राग्नी अपसस् पर्य् उप प्र यन्ति धीतयः ।
ऋतस्य पथ्या ३ अनु ॥ ३ ०१२ ०७
इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च ।
युवोर् अप्तूर्यं हितम् ॥ ३ ०१२ ०८
इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
तद् वां चेति प्र वीर्यम् ॥ ३ ०१२ ०९

(२४७)
प्र वो देवायाग्नये बर्हिष्ठम् अर्चास्मै ।
गमद् देवेभिर् आ स नो यजिष्ठो बर्हिर् आ सदत् ॥ ३ ०१३ ०१
ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः ।
हविष्मन्तस् तम् ईळते तं सनिष्यन्तो ऽवसे ॥ ३ ०१३ ०२
स यन्ता विप्र एषां स यज्ञानाम् अथा हि षः ।
अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ॥ ३ ०१३ ०३
स नः शर्माणि वीतये ऽग्निर् यच्छतु शंतमा ।
यतो नः प्रुष्णवद् वसु दिवि क्षितिभ्यो अप्स्व् आ ॥ ३ ०१३ ०४
दीदिवांसम् अपूर्व्यं वस्वीभिर् अस्य धीतिभिः ।
ऋक्वाणो अग्निम् इन्धते होतारं विश्पतिं विशाम् ॥ ३ ०१३ ०५
उत नो ब्रह्मन्न् अविष उक्थेषु देवहूतमः ।
शं नः शोचा मरुद्वृधो ऽग्ने सहस्रसातमः ॥ ३ ०१३ ०६
नू नो रास्व सहस्रवत् तोकवत् पुष्टिमद् वसु ।
द्युमद् अग्ने सुवीर्यं वर्षिष्ठम् अनुपक्षितम् ॥ ३ ०१३ ०७

(२४८)
आ होता मन्द्रो विदथान्य् अस्थात् सत्यो यज्वा कवितमः स वेधाः ।

विद्युद्रथः सहसस् पुत्रो अग्निः शोचिष्केशः पृथिव्याम् पाजो अश्रेत् ॥ ३ ०१४ ०१
अयामि ते नमऽउक्तिं जुषस्व ऋतावस् तुभ्यं चेतते सहस्वः ।
विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिर् ऊतये यजत्र ॥ ३ ०१४ ०२
द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिर् अच्छ ।
यत् सीम् अञ्जन्ति पूर्व्यं हविर्भिर् आ वन्धुरेव तस्थतुर् दुरोणे ॥ ३ ०१४ ०३
मित्रश् च तुभ्यं वरुणः सहस्वो ऽग्ने विश्वे मरुतः सुम्नम् अर्चन् ।
यच् छोचिषा सहसस् पुत्र तिष्ठा अभि क्षितीः प्रथयन् सूर्यो नॄन् ॥ ३ ०१४ ०४
वयं ते अद्य ररिमा हि कामम् उत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवान् अस्रेधता मन्मना विप्रो अग्ने ॥ ३ ०१४ ०५
त्वद् धि पुत्र सहसो वि पूर्वीर् देवस्य यन्त्य् ऊतयो वि वाजाः ।
त्वं देहि सहस्रिणं रयिं नो ऽद्रोघेण वचसा सत्यम् अग्ने ॥ ३ ०१४ ०६
तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म ।
त्वं विश्वस्य सुरथस्य बोधि सर्वं तद् अग्ने अमृत स्वदेह ॥ ३ ०१४ ०७

(२४९)
वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्याम् अग्नेर् अहं सुहवस्य प्रणीतौ ॥ ३ ०१५ ०१
त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।
जन्मेव नित्यं तनयं जुषस्व स्तोमम् मे अग्ने तन्वा सुजात ॥ ३ ०१५ ०२
त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्व् अग्ने अरुषो वि भाहि ।
वसो नेषि च पर्षि चात्य् अंहः कृधी नो राय उशिजो यविष्ठ ॥ ३ ०१५ ०३
अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान् ।
यज्ञस्य नेता प्रथमस्य पायोर् जातवेदो बृहतः सुप्रणीते ॥ ३ ०१५ ०४
अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः ।
रथो न सस्निर् अभि वक्षि वाजम् अग्ने त्वं रोदसी नः सुमेके ॥ ३ ०१५ ०५
प्र पीपय वृषभ जिन्व वाजान् अग्ने त्वं रोदसी नः सुदोघे ।
देवेभिर् देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ॥ ३ ०१५ ०६

इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ३ ०१५ ०७

(२५०)
अयम् अग्निः सुवीर्यस्येशे महः सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ३ ०१६ ०१
इमं नरो मरुतः सश्चता वृधं यस्मिन् रायः शेवृधासः ।
अभि ये सन्ति पृतनासु दूढ्यो विश्वाहा शत्रुम् आदभुः ॥ ३ ०१६ ०२
स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य ।
तुविद्युम्न वर्षिष्ठस्य प्रजावतो ऽनमीवस्य शुष्मिणः ॥ ३ ०१६ ०३
चक्रिर् यो विश्वा भुवनाभि सासहिश् चक्रिर् देवेष्व् आ दुवः ।
आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम् ॥ ३ ०१६ ०४
मा नो अग्ने ऽमतये मावीरतायै रीरधः ।
मागोतायै सहसस् पुत्र मा निदे ऽप द्वेषांस्य् आ कृधि ॥ ३ ०१६ ०५
शग्धि वाजस्य सुभग प्रजावतो ऽग्ने बृहतो अध्वरे ।
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥ ३ ०१६ ०६

(२५१)
समिध्यमानः प्रथमानु धर्मा सम् अक्तुभिर् अज्यते विश्ववारः ।
शोचिष्केशो घृतनिर्णिक् पावकः सुयज्ञो अग्निर् यजथाय देवान् ॥ ३ ०१७ ०१
यथायजो होत्रम् अग्ने पृथिव्या यथा दिवो जातवेदश् चिकित्वान् ।
एवानेन हविषा यक्षि देवान् मनुष्वद् यज्ञम् प्र तिरेमम् अद्य ॥ ३ ०१७ ०२
त्रीण्य् आयूंषि तव जातवेदस् तिस्र आजानीर् उषसस् ते अग्ने ।
ताभिर् देवानाम् अवो यक्षि विद्वान् अथा भव यजमानाय शं योः ॥ ३ ०१७ ०३
अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस् त्वेड्यं जातवेदः ।
त्वां दूतम् अरतिं हव्यवाहं देवा अकृण्वन्न् अमृतस्य नाभिम् ॥ ३ ०१७ ०४
यस् त्वद् धोता पूर्वो अग्ने यजीयान् द्विता च सत्ता स्वधया च शम्भुः ।

तस्यानु धर्म प्र यजा चिकित्वो ऽथ नो धा अध्वरं देववीतौ ॥ ३ ०१७ ०५

(२५२)
भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः ।
पुरुद्रुहो हि क्षितयो जनानाम् प्रति प्रतीचीर् दहताद् अरातीः ॥ ३ ०१८ ०१
तपो ष्व् अग्ने अन्तराँ अमित्रान् तपा शंसम् अररुषः परस्य ।
तपो वसो चिकितानो अचित्तान् वि ते तिष्ठन्ताम् अजरा अयासः ॥ ३ ०१८ ०२
इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावद् ईशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥ ३ ०१८ ०३
उच् छोचिषा सहसस् पुत्र स्तुतो बृहद् वयः शशमानेषु धेहि ।
रेवद् अग्ने विश्वामित्रेषु शं योर् मर्मृज्मा ते तन्व१म् भूरि कृत्वः ॥ ३ ०१८ ०४
कृधि रत्नं सुसनितर् धनानां स घेद् अग्ने भवसि यत् समिद्धः ।
स्तोतुर् दुरोणे सुभगस्य रेवत् सृप्रा करस्ना दधिषे वपूंषि ॥ ३ ०१८ ०५

(२५३)
अग्निं होतारम् प्र वृणे मियेधे गृत्सं कविं विश्वविदम् अमूरम् ।
स नो यक्षद् देवताता यजीयान् राये वाजाय वनते मघानि ॥ ३ ०१९ ०१
प्र ते अग्ने हविष्मतीम् इयर्म्य् अच्छा सुद्युम्नां रातिनीं घृताचीम् ।
प्रदक्षिणिद् देवतातिम् उराणः सं रातिभिर् वसुभिर् यज्ञम् अश्रेत् ॥ ३ ०१९ ०२
स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश् च वस्वः ॥ ३ ०१९ ०३
भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य यज्यवो जनासः ।
स आ वह देवतातिं यविष्ठ शर्धो यद् अद्य दिव्यं यजासि ॥ ३ ०१९ ०४
यत् त्वा होतारम् अनजन् मियेधे निषादयन्तो यजथाय देवाः ।
स त्वं नो अग्ने ऽवितेह बोध्य् अधि श्रवांसि धेहि नस् तनूषु ॥ ३ ०१९ ०५

(२५४)
अग्निम् उषसम् अश्विना दधिक्रां व्युष्टिषु हवते वह्निर् उक्थैः ।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ॥ ३ ०२० ०१
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस् ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास् ताभिर् नः पाहि गिरो अप्रयुच्छन् ॥ ३ ०२० ०२
अग्ने भूरीणि तव जातवेदो देव स्वधावो ऽमृतस्य नाम ।
याश् च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥ ३ ०२० ०३
अग्निर् नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद् विश्वाति दुरिता गृणन्तम् ॥ ३ ०२० ०४
दधिक्राम् अग्निम् उषसं च देवीम् बृहस्पतिं सवितारं च देवम् ।
अश्विना मित्रावरुणा भगं च वसून् रुद्राँ आदित्याँ इह हुवे ॥ ३ ०२० ०५

(२५५)
इमं नो यज्ञम् अमृतेषु धेहीमा हव्या जातवेदो जुषस्व ।
स्तोकानाम् अग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥ ३ ०२१ ०१
घृतवन्तः पावक ते स्तोका श्चोतन्ति मेदसः ।
स्वधर्मन् देववीतये श्रेष्ठं नो धेहि वार्यम् ॥ ३ ०२१ ०२
तुभ्यं स्तोका घृतश्चुतो ऽग्ने विप्राय सन्त्य ।
ऋषिः श्रेष्ठः सम् इध्यसे यज्ञस्य प्राविता भव ॥ ३ ०२१ ०३
तुभ्यं श्चोतन्त्य् अध्रिगो शचीव स्तोकासो अग्ने मेदसो घृतस्य ।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ॥ ३ ०२१ ०४
ओजिष्ठं ते मध्यतो मेद उद्भृतम् प्र ते वयं ददामहे ।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान् देवशो विहि ॥ ३ ०२१ ०५

(२५६)

अयं सो अग्निर् यस्मिन् सोमम् इन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजम् अत्यं न सप्तिं ससवान् सन् स्तूयसे जातवेदः ॥ ३ ०२२ ०१
अग्ने यत् ते दिवि वर्चः पृथिव्यां यद् ओषधीष्व् अप्स्व् आ यजत्र ।
येनान्तरिक्षम् उर्व् आततन्थ त्वेषः स भानुर् अर्णवो नृचक्षाः ॥ ३ ०२२ ०२
अग्ने दिवो अर्णम् अच्छा जिगास्य् अच्छा देवाँ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात् सूर्यस्य याश् चावस्ताद् उपतिष्ठन्त आपः ॥ ३ ०२२ ०३
पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः ।
जुषन्तां यज्ञम् अद्रुहो ऽनमीवा इषो महीः ॥ ३ ०२२ ०४
इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ३ ०२२ ०५

(२५७)
निर्मथितः सुधित आ सधस्थे युवा कविर् अध्वरस्य प्रणेता ।
जूर्यत्स्व् अग्निर् अजरो वनेष्व् अत्रा दधे अमृतं जातवेदाः ॥ ३ ०२३ ०१
अमन्थिष्टाम् भारता रेवद् अग्निं देवश्रवा देववातः सुदक्षम् ।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवताद् अनु द्यून् ॥ ३ ०२३ ०२
दश क्षिपः पूर्व्यं सीम् अजीजनन् सुजातम् मातृषु प्रियम् ।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानाम् असद् वशी ॥ ३ ०२३ ०३
नि त्वा दधे वर आ पृथिव्या इळायास् पदे सुदिनत्वे अह्नाम् ।
दृषद्वत्याम् मानुष आपयायां सरस्वत्यां रेवद् अग्ने दिदीहि ॥ ३ ०२३ ०४
इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ३ ०२३ ०५

(२५८)
अग्ने सहस्व पृतना अभिमातीर् अपास्य ।
दुष्टरस् तरन्न् अरातीर् वर्चो धा यज्ञवाहसे ॥ ३ ०२४ ०१

अग्न इळा सम् इध्यसे वीतिहोत्रो अमर्त्यः ।
जुषस्व सू नो अध्वरम् ॥ ३ ०२४ ०२
अग्ने द्युम्नेन जागृवे सहसः सूनव् आहुत ।
एदम् बर्हिः सदो मम ॥ ३ ०२४ ०३
अग्ने विश्वेभिर् अग्निभिर् देवेभिर् महया गिरः ।
यज्ञेषु य उ चायवः ॥ ३ ०२४ ०४
अग्ने दा दाशुषे रयिं वीरवन्तम् परीणसम् ।
शिशीहि नः सूनुमतः ॥ ३ ०२४ ०५

(२५९)
अग्ने दिवः सूनुर् असि प्रचेतास् तना पृथिव्या उत विश्ववेदाः ।
ऋधग् देवाँ इह यजा चिकित्वः ॥ ३ ०२५ ०१
अग्निः सनोति वीर्याणि विद्वान् सनोति वाजम् अमृताय भूषन् ।
स नो देवाँ एह वहा पुरुक्षो ॥ ३ ०२५ ०२
अग्निर् द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः ।
क्षयन् वाजैः पुरुश्चन्द्रो नमोभिः ॥ ३ ०२५ ०३
अग्न इन्द्रश् च दाशुषो दुरोणे सुतावतो यज्ञम् इहोप यातम् ।
अमर्धन्ता सोमपेयाय देवा ॥ ३ ०२५ ०४
अग्ने अपां सम् इध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः ।
सधस्थानि महयमान ऊती ॥ ३ ०२५ ०५

(२६०)
वैश्वानरम् मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम् ।
सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ॥ ३ ०२६ ०१
तं शुभ्रम् अग्निम् अवसे हवामहे वैश्वानरम् मातरिश्वानम् उक्थ्यम् ।
बृहस्पतिम् मनुषो देवतातये विप्रं श्रोतारम् अतिथिं रघुष्यदम् ॥ ३ ०२६ ०२

अश्वो न क्रन्दञ् जनिभिः सम् इध्यते वैश्वानरः कुशिकेभिर् युगे-युगे ।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नम् अमृतेषु जागृविः ॥ ३ ०२६ ०३
प्र यन्तु वाजास् तविषीभिर् अग्नयः शुभे सम्मिश्लाः पृषतीर् अयुक्षत ।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः ॥ ३ ०२६ ०४
अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषम् उग्रम् अव ईमहे वयम् ।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ॥ ३ ०२६ ०५
व्रातं-व्रातं गणं-गणं सुशस्तिभिर् अग्नेर् भामम् मरुताम् ओज ईमहे ।
पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः ॥ ३ ०२६ ०६
अग्निर् अस्मि जन्मना जातवेदा घृतम् मे चक्षुर् अमृतम् म आसन् ।
अर्कस् त्रिधातू रजसो विमानो ऽजस्रो घर्मो हविर् अस्मि नाम ॥ ३ ०२६ ०७
त्रिभिः पवित्रैर् अपुपोद् ध्य् अ१र्कं हृदा मतिं ज्योतिर् अनु प्रजानन् ।
वर्षिष्ठं रत्नम् अकृत स्वधाभिर् आद् इद् द्यावापृथिवी पर्य् अपश्यत् ॥ ३ ०२६ ०८
शतधारम् उत्सम् अक्षीयमाणं विपश्चितम् पितरं वक्त्वानाम् ।
मेळिम् मदन्तम् पित्रोर् उपस्थे तं रोदसी पिपृतं सत्यवाचम् ॥ ३ ०२६ ०९

(२६१)
प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या ।
देवाञ् जिगाति सुम्नयुः ॥ ३ ०२७ ०१
ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् ।
श्रुष्टीवानं धितावानम् ॥ ३ ०२७ ०२
अग्ने शकेम ते वयं यमं देवस्य वाजिनः ।
अति द्वेषांसि तरेम ॥ ३ ०२७ ०३
समिध्यमानो अध्वरे ऽग्निः पावक ईड्यः ।
शोचिष्केशस् तम् ईमहे ॥ ३ ०२७ ०४
पृथुपाजा अमर्त्यो घृतनिर्णिक् स्वाहुतः ।
अग्निर् यज्ञस्य हव्यवाट् ॥ ३ ०२७ ०५
तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः ।

आ चक्रुर् अग्निम् ऊतये ॥ ३ ०२७ ०६
होता देवो अमर्त्यः पुरस्ताद् एति मायया ।
विदथानि प्रचोदयन् ॥ ३ ०२७ ०७
वाजी वाजेषु धीयते ऽध्वरेषु प्र णीयते ।
विप्रो यज्ञस्य साधनः ॥ ३ ०२७ ०८
धिया चक्रे वरेण्यो भूतानां गर्भम् आ दधे ।
दक्षस्य पितरं तना ॥ ३ ०२७ ०९
नि त्वा दधे वरेण्यं दक्षस्येळा सहस्कृत ।
अग्ने सुदीतिम् उशिजम् ॥ ३ ०२७ १०
अग्निं यन्तुरम् अप्तुरम् ऋतस्य योगे वनुषः ।
विप्रा वाजैः सम् इन्धते ॥ ३ ०२७ ११
ऊर्जो नपातम् अध्वरे दीदिवांसम् उप द्यवि ।
अग्निम् ईळे कविक्रतुम् ॥ ३ ०२७ १२
ईळेन्यो नमस्यस् तिरस् तमांसि दर्शतः ।
सम् अग्निर् इध्यते वृषा ॥ ३ ०२७ १३
वृषो अग्निः सम् इध्यते ऽश्वो न देववाहनः ।
तं हविष्मन्त ईळते ॥ ३ ०२७ १४
वृषणं त्वा वयं वृषन् वृषणः सम् इधीमहि ।
अग्ने दीद्यतम् बृहत् ॥ ३ ०२७ १५

(२६२)
अग्ने जुषस्व नो हविः पुरोळाशं जातवेदः ।
प्रातःसावे धियावसो ॥ ३ ०२८ ०१
पुरोळा अग्ने पचतस् तुभ्यं वा घा परिष्कृतः ।
तं जुषस्व यविष्ठ्य ॥ ३ ०२८ ०२
अग्ने वीहि पुरोळाशम् आहुतं तिरोअह्न्यम् ।
सहसः सूनुर् अस्य् अध्वरे हितः ॥ ३ ०२८ ०३

माध्यंदिने सवने जातवेदः पुरोळाशम् इह कवे जुषस्व ।
अग्ने यह्वस्य तव भागधेयं न प्र मिनन्ति विदथेषु धीराः ॥ ३ ०२८ ०४
अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनव् आहुतम् ।
अथा देवेष्व् अध्वरं विपन्यया धा रत्नवन्तम् अमृतेषु जागृविम् ॥ ३ ०२८ ०५
अग्ने वृधान आहुतिम् पुरोळाशं जातवेदः ।
जुषस्व तिरोअह्न्यम् ॥ ३ ०२८ ०६

(२६३)
अस्तीदम् अधिमन्थनम् अस्ति प्रजननं कृतम् ।
एतां विश्पत्नीम् आ भराग्निम् मन्थाम पूर्वथा ॥ ३ ०२९ ०१
अरण्योर् निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ।
दिवे-दिव ईड्यो जागृवद्भिर् हविष्मद्भिर् मनुष्येभिर् अग्निः ॥ ३ ०२९ ०२
उत्तानायाम् अव भरा चिकित्वान् सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशद् अस्य पाज इळायास् पुत्रो वयुनेऽजनिष्ट ॥ ३ ०२९ ०३
इळायास् त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो नि धीमह्य् अग्ने हव्याय वोळ्हवे ॥ ३ ०२९ ०४
मन्थता नरः कविम् अद्वयन्तम् प्रचेतसम् अमृतं सुप्रतीकम् ।
यज्ञस्य केतुम् प्रथमम् पुरस्ताद् अग्निं नरो जनयता सुशेवम् ॥ ३ ०२९ ०५
यदी मन्थन्ति बाहुभिर् वि रोचतेऽश्वो न वाज्य् अरुषो वनेष्व् आ ।
चित्रो न यामन्न् अश्विनोर् अनिवृतः परि वृणक्त्य् अश्मनस् तृणा दहन् ॥ ३ ०२९ ०६
जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः ।
यं देवास ईड्यं विश्वविदं हव्यवाहम् अदधुर् अध्वरेषु ॥ ३ ०२९ ०७
सीद होतः स्व उ लोके चिकित्वान् सादया यज्ञं सुकृतस्य योनौ ।
देवावीर् देवान् हविषा यजास्य् अग्ने बृहद् यजमाने वयो धाः ॥ ३ ०२९ ०८
कृणोत धूमं वृषणं सखायोऽस्रेधन्त इतन वाजम् अच्छ ।
अयम् अग्निः पृतनाषाट् सुवीरो येन देवासो असहन्त दस्यून् ॥ ३ ०२९ ०९
अयं ते योनिर् ऋत्वियो यतो जातो अरोचथाः ।

तं जानन्न् अग्न आ सीदाथा नो वर्धया गिरः ॥ ३ ०२९ १०
तनूनपाद् उच्यते गर्भ आसुरो नराशंसो भवति यद् विजायते ।
मातरिश्वा यद् अमिमीत मातरि वातस्य सर्गो अभवत् सरीमणि ॥ ३ ०२९ ११
सुनिर्मथा निर्मथितः सुनिधा निहितः कविः ।
अग्ने स्वध्वरा कृणु देवान् देवयते यज ॥ ३ ०२९ १२
अजीजनन्न् अमृतम् मर्त्यासो ऽस्रेमाणं तरणिं वीळुजम्भम् ।
दश स्वसारो अग्रुवः समीचीः पुमांसं जातम् अभि सं रभन्ते ॥ ३ ०२९ १३
प्र सप्तहोता सनकाद् अरोचत मातुर् उपस्थे यद् अशोचद् ऊधनि ।
न नि मिषति सुरणो दिवे-दिवे यद् असुरस्य जठराद् अजायत ॥ ३ ०२९ १४
अमित्रायुधो मरुताम् इव प्रयाः प्रथमजा ब्रह्मणो विश्वम् इद् विदुः ।
द्युम्नवद् ब्रह्म कुशिकास एरिर एक-एको दमे अग्निं सम् ईधिरे ॥ ३ ०२९ १५
यद् अद्य त्वा प्रयति यज्ञे अस्मिन् होतश् चिकित्वो ऽवृणीमहीह ।
ध्रुवम् अया ध्रुवम् उताशमिष्ठाः प्रजानन् विद्वाँ उप याहि सोमम् ॥ ३ ०२९ १६

(२६४)
इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि ।
तितिक्षन्ते अभिशस्तिं जनानाम् इन्द्र त्वद् आ कश् चन हि प्रकेतः ॥ ३ ०३० ०१
न ते दूरे परमा चिद् रजांस्य् आ तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥ ३ ०३० ०२
इन्द्रः सुशिप्रो मघवा तरुत्रो महाव्रातस् तुविकूर्मिर् ऋघावान् ।
यद् उग्रो धा बाधितो मर्त्येषु क्व १ त्या ते वृषभ वीर्याणि ॥ ३ ०३० ०३
त्वं हि ष्मा च्यावयन्न् अच्युतान्य् एको वृत्रा चरसि जिघ्नमानः ।
तव द्यावापृथिवी पर्वतासो ऽनु व्रताय निमितेव तस्थुः ॥ ३ ०३० ०४
उताभये पुरुहूत श्रवोभिर् एको दृळ्हम् अवदो वृत्रहा सन् ।
इमे चिद् इन्द्र रोदसी अपारे यत् संगृभ्णा मघवन् काशिर् इत् ते ॥ ३ ०३० ०५
प्र सू त इन्द्र प्रवता हरिभ्याम् प्र ते वज्रः प्रमृणन्न् एतु शत्रून् ।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टम् अस्तु ॥ ३ ०३० ०६

यस्मै धायुर् अदधा मर्त्यायाभक्तं चिद् भजते गेह्यं१ सः ।
भद्रा त इन्द्र सुमतिर् घृताची सहस्रदाना पुरुहूत रातिः ॥ ३ ०३० ०७
सहदानुम् पुरुहूत क्षियन्तम् अहस्तम् इन्द्र सम् पिणक् कुणारुम् ।
अभि वृत्रं वर्धमानम् पियारुम् अपादम् इन्द्र तवसा जघन्थ ॥ ३ ०३० ०८
नि सामनाम् इषिराम् इन्द्र भूमिम् महीम् अपारां सदने ससत्थ ।
अस्तभ्नाद् द्यां वृषभो अन्तरिक्षम् अर्षन्त्व् आपस् त्वयेह प्रसूताः ॥ ३ ०३० ०९
अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर् भयमानो व्य् आर ।
सुगान् पथो अकृणोन् निरजे गाः प्रावन् वाणीः पुरुहूतं धमन्तीः ॥ ३ ०३० १०
एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीम् उत द्याम् ।
उतान्तरिक्षाद् अभि नः समीक इषो रथीः सयुजः शूर वाजान् ॥ ३ ०३० ११
दिशः सूर्यो न मिनाति प्रदिष्टा दिवे-दिवे हर्यश्वप्रसूताः ।
सं यद् आनळ् अध्वन आद् इद् अश्वैर् विमोचनं कृणुते तत् त्व् अस्य ॥ ३ ०३० १२
दिदृक्षन्त उषसो यामन्न् अक्तोर् विवस्वत्या महि चित्रम् अनीकम् ।
विश्वे जानन्ति महिना यद् आगाद् इन्द्रस्य कर्म सुकृता पुरूणि ॥ ३ ०३० १३
महि ज्योतिर् निहितं वक्षणास्व् आमा पक्वं चरति बिभ्रती गौः ।
विश्वं स्वाद्म सम्भृतम् उस्रियायां यत् सीम् इन्द्रो अदधाद् भोजनाय ॥ ३ ०३० १४
इन्द्र दृह्य यामकोशा अभूवन् यज्ञाय शिक्ष गृणते सखिभ्यः ।
दुर्मायवो दुरेवा मर्त्यासो निषङ्गिणो रिपवो हन्त्वासः ॥ ३ ०३० १५
सं घोषः शृण्वे ऽवमैर् अमित्रैर् जही न्य् एष्व् अशनिं तपिष्ठाम् ।
वृश्चेम् अधस्ताद् वि रुजा सहस्व जहि रक्षो मघवन् रन्धयस्व ॥ ३ ०३० १६
उद् वृह रक्षः सहमूलम् इन्द्र वृश्चा मध्यम् प्रत्य् अग्रं शृणीहि ।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिम् अस्य ॥ ३ ०३० १७
स्वस्तये वाजिभिश् च प्रणेतः सं यन् महीर् इष आसत्सि पूर्वीः ।
रायो वन्तारो बृहतः स्यामास्मे अस्तु भग इन्द्र प्रजावान् ॥ ३ ०३० १८
आ नो भर भगम् इन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके ।
ऊर्व इव पप्रथे कामो अस्मे तम् आ पृण वसुपते वसूनाम् ॥ ३ ०३० १९
इमं कामम् मन्दया गोभिर् अश्वैश् चन्द्रवता राधसा पप्रथश् च ।
स्वर्यवो मतिभिस् तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥ ३ ०३० २०

आ नो॑ गो॒त्रा द॑र्दृहि गोप॒ते गाः सम् अ॒स्मभ्यं॑ स॒नयो॑ यन्तु वाजाः॑ ।
दि॒वक्षा॑ असि वृषभ स॒त्यशु॑ष्मो ऽस्मभ्यं॑ सु म॑घवन् बोधि गो॒दाः ॥ ३ ०३० २१
शु॒नं हु॑वेम म॒घवा॑न॒म् इन्द्र॑म् अ॒स्मिन् भ॒रे नृत॑मं॒ वाज॑सातौ ।
शृ॒ण्वन्त॑म् उ॒ग्रम् ऊ॒तये॑ स॒मत्सु॒ घ्नन्तं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नाम् ॥ ३ ०३० २२

(२६५)
शास॒द् वह्नि॑र् दुहि॒तुर् न॒प्त्यं गाद् वि॒द्वाँ ऋ॒तस्य दीधि॑तिं सप॒र्यन् ।
पि॒ता यत्र॑ दुहि॒तुः सेक॑म् ऋ॒ञ्जन् सं श॒ग्म्येन॒ मन॑सा दध॒न्वे ॥ ३ ०३१ ०१
न जा॒मये॒ तान्वो॑ रि॒क्थम् आ॑रैक् च॒कार॒ गर्भं॑ सनि॒तुर् नि॒धान॑म् ।
यदी॑ मा॒तरो॑ ज॒नय॑न्त॒ वह्नि॑म् अ॒न्यः क॒र्ता सु॒कृतो॑र् अ॒न्य ऋ॒न्धन् ॥ ३ ०३१ ०२
अ॒ग्निर् ज॑ज्ञे जु॒ह्वा॒ ३ रेज॑मानो म॒हस् पु॒त्राँ अ॑रु॒षस्य॑ प्र॒यक्षे॑ ।
म॒हान् गर्भो॒ मह्या जा॒तम् ए॑षाम् म॒ही प्र॒वृद् ध॒र्यश्व॑स्य य॒ज्ञैः ॥ ३ ०३१ ०३
अ॒भि जैत्री॑र् असचन्त स्पृधा॒नम् महि॒ ज्योति॒स् तम॑सो॒ निर् अ॑जानन् ।
तं जा॑न॒तीः प्रत्य् उद् आ॑यन्न् उ॒षासः॒ पति॒र् गवा॑म् अभव॒द् एक॒ इन्द्रः॑ ॥ ३ ०३१ ०४
वी॒ळौ स॒तीर् अ॒भि धीरा॑ अतृन्दन् प्रा॒चाहि॑न्वन् मन॑सा स॒प्त विप्राः॑ ।
विश्वा॑म् अविन्दन् प॒थ्याम् ऋ॒तस्य॑ प्रजा॒नन्न् इत् ता नम॒सा वि॑वेश ॥ ३ ०३१ ०५
वि॒दद् यदी॑ स॒रमा॑ रु॒ग्णम् अद्रे॒र् महि॒ पाथः॑ पू॒र्व्यं स॒ध्र्यक् कः ।
अग्रं॑ नयत् सु॒पद्य् अक्ष॑राणा॒म् अच्छा॒ रव॑म् प्र॒थमा जा॑न॒ती गा॑त् ॥ ३ ०३१ ०६
अग॑च्छ॒द् उ॒ विप्र॑तमः सखी॒यन्न् असू॑दयत् सु॒कृते॒ गर्भ॒म् अद्रिः॑ ।
स॒सान॒ मर्यो॑ युव॑भिर् मख॒स्यन्न् अथा॑भवद् अङ्गि॑राः स॒द्यो अर्च॑न् ॥ ३ ०३१ ०७
स॒तः-स॑तः प्रति॒मान॑म् पु॒रो॒भूर् विश्वा॑ वे॒द जनि॑मा॒ हन्ति॒ शुष्ण॑म् ।
प्र णो॑ दि॒वः प॑द॒वीर् ग॒व्युर् अर्च॒न् सखा॒ सखीँ॑र् अमुञ्च॒न् निर् अ॑वद्यात् ॥ ३ ०३१ ०८
नि ग॑व्य॒ता मन॑सा सेदु॒र् अ॒र्कैः कृ॑ण्वा॒नासो॑ अमृत॒त्वाय॑ गा॒तुम् ।
इ॒दं चि॒न् नु सद॑न॒म् भूर्य् ए॑षां॒ येन॒ मासाँ॒ असि॑षासन्न् ऋ॒तेन॑ ॥ ३ ०३१ ०९
स॒म्पश्य॑माना अमदन्न् अ॒भि स्वम् पयः॑ प्र॒त्नस्य॒ रेत॑सो॒ दुघा॑नाः ।
वि रोद॑सी अतप॒द् घोष॑ एषां जा॒ते नि॒ष्ठाम् अद॑धु॒र् गोषु॑ वी॒रान् ॥ ३ ०३१ १०
स जा॒तेभि॑र् वृ॒त्रहा सेद् उ॑ ह॒व्यैर् उद् उ॒स्रिया॑ असृज॒द् इन्द्रो॑ अ॒र्कैः ।

उरूच्य् अस्मै घृतवद् भरन्ती मधु स्वाद्म दुदुहे जेन्या गौः ॥ ३ ०३१ ११
पित्रे चिच् चक्रुः सदनं सम् अस्मै महि त्विषीमत् सुकृतो वि हि ख्यन् ।
विष्कभ्नन्त स्कम्भनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् ॥ ३ ०३१ १२
मही यदि धिषणा शिश्नथे धात् सद्योवृधं विभ्वं १ं रोदस्योः ।
गिरो यस्मिन्न् अनवद्याः समीचीर् विश्वा इन्द्राय तविषीर् अनुत्ताः ॥ ३ ०३१ १३
मह्य् आ ते सख्यं वश्मि शक्तीर् आ वृत्रघ्ने नियुतो यन्ति पूर्वीः ।
महि स्तोत्रम् अव आगन्म सूरेर् अस्माकं सु मघवन् बोधि गोपाः ॥ ३ ०३१ १४
महि क्षेत्रम् पुरु श्चन्द्रं विविद्वान् आद् इत् सखिभ्यश् चरथं सम् ऐरत् ।
इन्द्रो नृभिर् अजनद् दीद्यानः साकं सूर्यम् उषसं गातुम् अग्निम् ॥ ३ ०३१ १५
अपश् चिद् एष विभ्वो ३ दमूनाः प्र सध्रीचीर् असृजद् विश्वश्चन्द्राः ।
मध्वः पुनानाः कविभिः पवित्रैर् द्युभिर् हिन्वन्त्य् अक्तुभिर् धनुत्रीः ॥ ३ ०३१ १६
अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य मंहना यजत्रे ।
परि यत् ते महिमानं वृजध्यै सखाय इन्द्र काम्या ऋजिप्याः ॥ ३ ०३१ १७
पतिर् भव वृत्रहन् सूनृतानां गिरां विश्वायुर् वृषभो वयोधाः ।
आ नो गहि सख्येभिः शिवेभिर् महान् महीभिर् ऊतिभिः सरण्यन् ॥ ३ ०३१ १८
तम् अङ्गिरस्वन् नमसा सपर्यन् नव्यं कृणोमि सन्यसे पुराजाम् ।
द्रुहो वि याहि बहुला अदेवीः स्वश् च नो मघवन् सातये धाः ॥ ३ ०३१ १९
मिहः पावकाः प्रतता अभूवन् स्वस्ति नः पिपृहि पारम् आसाम् ।
इन्द्र त्वं रथिरः पाहि नो रिषो मक्षू-मक्षू कृणुहि गोजितो नः ॥ ३ ०३१ २०
अदेदिष्ट वृत्रहा गोपतिर् गा अन्तः कृष्णाꣳ अरुषैर् धामभिर् गात् ।
प्र सूनृता दिशमान ऋतेन दुरश् च विश्वा अवृणोद् अप स्वाः ॥ ३ ०३१ २१
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०३१ २२

(२६६)
इन्द्र सोमं सोमपते पिबेमम् माध्यंदिनं सवनं चारु यत् ते ।
प्रप्रुथ्या शिप्रे मघवन्न् ऋजीषिन् विमुच्या हरी इह मादयस्व ॥ ३ ०३२ ०१

गवाशिरम् मन्थिनम् इन्द्र शुक्रम् पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस् तृपद् आ वृषस्व ॥ ३ ०३२ ०२
ये ते शुष्मं ये तविषीम् अवर्धन्न् अर्चन्त इन्द्र मरुतस् त ओजः ।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥ ३ ०३२ ०३
त इन् न्व् अस्य मधुमद् विविप्र इन्द्रस्य शर्धो मरुतो य आसन् ।
येभिर् वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥ ३ ०३२ ०४
मनुष्वद् इन्द्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिर् अपो अर्णा सिसर्षि ॥ ३ ०३२ ०५
त्वम् अपो यद् ध वृत्रं जघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ ।
शयानम् इन्द्र चरता वधेन वव्रिवांसम् परि देवीर् अदेवम् ॥ ३ ०३२ ०६
यजाम इन् नमसा वृद्धम् इन्द्रम् बृहन्तम् ऋष्वम् अजरं युवानम् ।
यस्य प्रिये ममतुर् यज्ञियस्य न रोदसी महिमानम् ममाते ॥ ३ ०३२ ०७
इन्द्रस्य कर्म सुकृता पुरूणि व्रतानि देवा न मिनन्ति विश्वे ।
दाधार यः पृथिवीं द्याम् उतेमां जजान सूर्यम् उषसं सुदंसाः ॥ ३ ०३२ ०८
अद्रोघ सत्यं तव तन् महित्वं सद्यो यज् जातो अपिबो ह सोमम् ।
न द्याव इन्द्र तवसस् त ओजो नाहा न मासाः शरदो वरन्त ॥ ३ ०३२ ०९
त्वं सद्यो अपिबो जात इन्द्र मदाय सोमम् परमे व्योमन् ।
यद् ध द्यावापृथिवी आविवेशीर् अथाभवः पूर्व्यः कारुधायाः ॥ ३ ०३२ १०
अहन्न् अहिम् परिशयानम् अर्ण ओजायमानं तुविजात तव्यान् ।
न ते महित्वम् अनु भूद् अध द्यौर् यद् अन्यया स्फिग्या ३ क्षाम् अवस्थाः ॥ ३ ०३२ ११
यज्ञो हि त इन्द्र वर्धनो भूद् उत प्रियः सुतसोमो मियेधः ।
यज्ञेन यज्ञम् अव यज्ञियः सन् यज्ञस् ते वज्रम् अहिहत्य आवत् ॥ ३ ०३२ १२
यज्ञेनेन्द्रम् अवसा चक्रे अर्वाग् ऐनं सुम्नाय नव्यसे ववृत्याम् ।
य स्तोमेभिर् वावृधे पूर्व्येभिर् यो मध्यमेभिर् उत नूतनेभिः ॥ ३ ०३२ १३
विवेष यन् मा धिषणा जजान स्तवै पुरा पार्याद् इन्द्रम् अह्नः ।
अंहसो यत्र पीपरद् यथा नो नावेव यान्तम् उभये हवन्ते ॥ ३ ०३२ १४
आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।

सम् उ प्रिया आववृत्रन् मदाय प्रदक्षिणिद् अभि सोमास इन्द्रम् ॥ ३ ०३२ १५
न त्वा गभीरः पुरुहूत सिन्धुर् नाद्रयः परि षन्तो वरन्त ।
इत्था सखिभ्य इषितो यद् इन्द्रा दृळ्हं चिद् अरुजो गव्यम् ऊर्वम् ॥ ३ ०३२ १६
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०३२ १७

(२६७)
प्र पर्वतानाम् उशती उपस्थाद् अश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट् छुतुद्री पयसा जवेते ॥ ३ ०३३ ०१
इन्द्रेषिते प्रसवम् भिक्षमाणे अच्छा समुद्रं रथ्येव याथः ।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वाम् अन्याम् अप्य् एति शुभ्रे ॥ ३ ०३३ ०२
अच्छा सिन्धुम् मातृतमाम् अयासं विपाशम् उर्वीं सुभगाम् अगन्म ।
वत्सम् इव मातरा संरिहाणे समानं योनिम् अनु संचरन्ती ॥ ३ ०३३ ०३
एना वयम् पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः ।
न वर्तवे प्रसवः सर्गतक्तः किंयुर् विप्रो नद्यो जोहवीति ॥ ३ ०३३ ०४
रमध्वम् मे वचसे सोम्याय ऋतावरीर् उप मुहूर्तम् एवैः ।
प्र सिन्धुम् अच्छा बृहती मनीषावस्युर् अह्वे कुशिकस्य सूनुः ॥ ३ ०३३ ०५
इन्द्रो अस्माꣳ अरदद् वज्रबाहुर् अपाहन् वृत्रम् परिधिं नदीनाम् ।
देवो ऽनयत् सविता सुपाणिस् तस्य वयम् प्रसवे याम उर्वीः ॥ ३ ०३३ ०६
प्रवाच्यं शश्वधा वीर्यं१ तद् इन्द्रस्य कर्म यद् अहिं विवृश्चत् ।
वि वज्रेण परिषदो जघानायन्न् आपो ऽयनम् इच्छमानाः ॥ ३ ०३३ ०७
एतद् वचो जरितर् मापि मृष्ठा आ यत् ते घोषान् उत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस् ते ॥ ३ ०३३ ०८
ओ षु स्वसारः कारवे शृणोत ययौ वो दूराद् अनसा रथेन ।
नि षू नमध्वम् भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥ ३ ०३३ ०९
आ ते कारो शृणवामा वचांसि ययाथ दूराद् अनसा रथेन ।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥ ३ ०३३ १०

यद् अ॒ङ्ग त्वा॑ भ॒रताः सं॑तरे॑युर् ग॒व्यन् ग्राम॑ इषि॒त इन्द्र॑जूतः ।
अर्षा॒द् अह॑ प्र॒सवः सर्ग॑तक्त आ वो॑ वृणे सु॒म॒तिं य॒ज्ञिया॑नाम् ॥ ३ ०३३ ११
अता॑रिषुर् भ॒रता ग॒व्यवः सम् अभ॑क्त विप्रः॑ सु॒म॒तिं न॒दीना॑म् ।
प्र पि॑न्वध्वम् इ॒षय॑न्तीः सु॒राधा॒ आ व॒क्षणाः॑ पृ॒णध्वं॑ या॒त शीभ॑म् ॥ ३ ०३३ १२
उद् व॑ ऊ॒र्मिः शम्या॑ ह॒न्त्व् आपो॒ योक्त्रा॑णि मुञ्चत ।
मादु॑ष्कृतौ॒ व्येनसा॒घ्न्यौ शू॒नम् आर॑ताम् ॥ ३ ०३३ १३

(२६८)
इन्द्रः॑ पू॒र्भिद् आति॑र॒द् दास॑म् अ॒र्कैर् वि॒दद्व॑सु॒र् दय॑मानो॒ वि शत्रू॑न् ।
ब्रह्म॑जूतस् त॒न्वा वावृधा॒नो भूरि॑दात्र आपृ॑ण॒द् रोद॑सी उ॒भे ॥ ३ ०३४ ०१
म॒खस्य॑ ते तवि॒षस्य॒ प्र जू॒तिम् इय॑र्मि॒ वाच॑म् अ॒मृता॑य॒ भूष॑न् ।
इन्द्र॑ क्षिती॒नाम् अ॑सि॒ मानु॑षीणां वि॒शां दैवी॑नाम् उ॒त पू॑र्व॒यावा॑ ॥ ३ ०३४ ०२
इन्द्रो॑ वृ॒त्रम् अ॑वृणो॒च् छर्ध॑नीतिः॒ प्र मा॒यिना॑म् अमिना॒द् वर्प॑णीतिः ।
अह॒न् व्यंसम् उ॒शध॒ग् वने॑ष्व् आ॒विर् धेना॑ अकृणोद् रा॒म्याणा॑म् ॥ ३ ०३४ ०३
इन्द्रः॑ स्व॒र्षा ज॒नय॒न् अहा॑नि जि॒गायो॒शिग्भिः॒ पृत॑ना अभि॒ष्टिः ।
प्रारो॑चय॒न् मन॑वे के॒तुम् अह्ना॒म् अवि॑न्दज् ज्योति॑र् बृह॒ते रणा॑य ॥ ३ ०३४ ०४
इन्द्र॒स् तुजो॑ ब॒र्हणा॒ आ वि॑वेश नृ॒वद् दधा॑नो॒ नर्या॑ पु॒रूणि॑ ।
अचे॑तय॒द् धिय॑ इ॒मा ज॑रि॒त्रे प्रेमं वर्ण॑म् अतिरच् छु॒क्रम् आ॑साम् ॥ ३ ०३४ ०५
म॒हो म॒हानि॑ पनयन्त्य् अ॒स्येन्द्र॑स्य॒ कर्म॒ सुकृ॑ता पु॒रूणि॑ ।
वृ॒जने॑न वृजि॒नान् सम् पि॑पेष मा॒याभि॒र् दस्यूँ॑र् अ॒भिभू॑त्योजाः ॥ ३ ०३४ ०६
यु॒धेन्द्रो॑ म॒ह्ना वरि॑वश् चकार दे॒वेभ्यः॒ सत्प॑तिश् चर्षणि॒प्राः ।
वि॒वस्व॑तः॒ सद॑ने अस्य॒ तानि॒ विप्रा॑ उ॒क्थेभिः॑ क॒वयो॑ गृणन्ति ॥ ३ ०३४ ०७
स॒त्रा॒साहं॒ वरे॑ण्यं सहो॒दां स॑स॒वांसं॒ स्व॑र् अ॒पश् च॑ दे॒वीः ।
स॒सान॒ यः पृ॑थि॒वीं द्याम् उ॒तेमाम् इन्द्र॑म् मद॒न्त्य् अनु॒ धीर॑णासः ॥ ३ ०३४ ०८
स॒साना॒त्याँ॑ उ॒त सूर्यं॑ ससा॒नेन्द्रः॑ ससान पु॒रुभोज॑सं॒ गाम् ।
हि॒र॒ण्यय॑म् उ॒त भोगं॑ ससान ह॒त्वी दस्यू॒न् प्रार्यं॒ वर्ण॑म् आवत् ॥ ३ ०३४ ०९
इन्द्र॒ ओष॑धीर् असनो॒द् अहा॑नि॒ व॒नस्पती॑ँर् असनोद् अ॒न्तरि॑क्षम् ।

बिभेद वलं नुनुदे विवाचो ऽथाभवद् दमिताभिक्रतूनाम् ॥ ३ ०३४ १०
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०३४ ११

(२६९)
तिष्ठा हरी रथ आ युज्यमाना याहि वायुर् न नियुतो नो अच्छ ।
पिबास्य् अन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा ररिमा ते मदाय ॥ ३ ०३५ ०१
उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्व् आ युनज्मि ।
द्रवद् यथा सम्भृतं विश्वतश् चिद् उपेमं यज्ञम् आ वहात इन्द्रम् ॥ ३ ०३५ ०२
उपो नयस्व वृषणा तपुष्पोतेम् अव त्वं वृषभ स्वधावः ।
ग्रसेताम् अश्वा वि मुचेह शोणा दिवे-दिवे सदृशीर् अद्धि धानाः ॥ ३ ०३५ ०३
ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू ।
स्थिरं रथं सुखम् इन्द्राधितिष्ठन् प्रजानन् विद्वाँ उप याहि सोमम् ॥ ३ ०३५ ०४
मा ते हरी वृषणा वीतपृष्ठा नि रीरमन् यजमानासो अन्ये ।
अत्यायाहि शश्वतो वयं ते ऽरं सुतेभिः कृणवाम सोमैः ॥ ३ ०३५ ०५
तवायं सोमस् त्वम् एह्य् अर्वाङ् छश्वत्तमं सुमना अस्य पाहि ।
अस्मिन् यज्ञे बर्हिष्य् आ निषद्या दधिष्वेमं जठर इन्दुम् इन्द्र ॥ ३ ०३५ ०६
स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम् ।
तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ॥ ३ ०३५ ०७
इमं नरः पर्वतास् तुभ्यम् आपः सम् इन्द्र गोभिर् मधुमन्तम् अक्रन् ।
तस्यागत्या सुमना ऋष्व पाहि प्रजानन् विद्वान् पथ्या अनु स्वाः ॥ ३ ०३५ ०८
याँ आभजो मरुत इन्द्र सोमे ये त्वाम् अवर्धन्न् अभवन् गणस् ते ।
तेभिर् एतं सजोषा वावशानो ऽग्नेः पिब जिह्वया सोमम् इन्द्र ॥ ३ ०३५ ०९
इन्द्र पिब स्वधया चित् सुतस्याग्नेर् वा पाहि जिह्वया यजत्र ।
अध्वर्योर् वा प्रयतं शक्र हस्ताद् धोतुर् वा यज्ञं हविषो जुषस्व ॥ ३ ०३५ १०
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०३५ ११

(२७०)

इमाम् ऊ षु प्रभृतिं सातये धाः शश्वच्-छश्वद् ऊतिभिर् यादमानः ।
सुते-सुते वावृधे वर्धनेभिर् यः कर्मभिर् महद्भिः सुश्रुतो भूत् ॥ ३ ०३६ ०१
इन्द्राय सोमाः प्रदिवो विदाना ऋभुर् येभिर् वृषपर्वा विहायाः ।
प्रयम्यमानान् प्रति षू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ॥ ३ ०३६ ०२
पिबा वर्धस्व तव घा सुतास इन्द्र सोमासः प्रथमा उतेमे ।
यथापिबः पूर्व्याँ इन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥ ३ ०३६ ०३
महाँ अमत्रो वृजने विरप्श्य् उ१ग्रं शवः पत्यते धृष्ण्व् ओजः ।
नाह विव्याच पृथिवी चनैनं यत् सोमासो हर्यश्वम् अमन्दन् ॥ ३ ०३६ ०४
महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन ।
इन्द्रो भगो वाजदा अस्य गावः प्र जायन्ते दक्षिणा अस्य पूर्वीः ॥ ३ ०३६ ०५
प्र यत् सिन्धवः प्रसवं यथायन्न् आपः समुद्रं रथ्येव जग्मुः ।
अतश् चिद् इन्द्रः सदसो वरीयान् यद् ईं सोमः पृणति दुग्धो अंशुः ॥ ३ ०३६ ०६
समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतम् भरन्तः ।
अंशुं दुहन्ति हस्तिनो भरित्रैर् मध्वः पुनन्ति धारया पवित्रैः ॥ ३ ०३६ ०७
ह्रदा इव कुक्षयः सोमधानाः सम् ईं विव्याच सवना पुरूणि ।
अन्ना यद् इन्द्रः प्रथमा व्य् आश वृत्रं जघन्वाँ अवृणीत सोमम् ॥ ३ ०३६ ०८
आ तू भर माकिर् एतत् परि ष्ठाद् विद्मा हि त्वा वसुपतिं वसूनाम् ।
इन्द्र यत् ते माहिनं दत्रम् अस्त्य् अस्मभ्यं तद् धर्यश्व प्र यन्धि ॥ ३ ०३६ ०९
अस्मे प्र यन्धि मघवन्न् ऋजीषिन्न् इन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीराञ् छश्वत इन्द्र शिप्रिन् ॥ ३ ०३६ १०
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०३६ ११

(२७१)

वार्त्रहत्याय शवसे पृतनाषाह्याय च ।
इन्द्र त्वा वर्तयामसि ॥ ३ ०३७ ०१
अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो ।
इन्द्र कृण्वन्तु वाघतः ॥ ३ ०३७ ०२
नामानि ते शतक्रतो विश्वाभिर् गीर्भिर् ईमहे ।
इन्द्राभिमातिषाह्ये ॥ ३ ०३७ ०३
पुरुष्टुतस्य धामभिः शतेन महयामसि ।
इन्द्रस्य चर्षणीधृतः ॥ ३ ०३७ ०४
इन्द्रं वृत्राय हन्तवे पुरुहूतम् उप ब्रुवे ।
भरेषु वाजसातये ॥ ३ ०३७ ०५
वाजेषु सासहिर् भव त्वाम् ईमहे शतक्रतो ।
इन्द्र वृत्राय हन्तवे ॥ ३ ०३७ ०६
द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवस्सु च ।
इन्द्र साक्ष्वाभिमातिषु ॥ ३ ०३७ ०७
शुष्मिन्तमं न ऊतये द्युम्निनम् पाहि जागृविम् ।
इन्द्र सोमं शतक्रतो ॥ ३ ०३७ ०८
इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु ।
इन्द्र तानि त आ वृणे ॥ ३ ०३७ ०९
अगन्न् इन्द्र श्रवो बृहद् द्युम्नं दधिष्व दुष्टरम् ।
उत् ते शुष्मं तिरामसि ॥ ३ ०३७ १०
अर्वावतो न आ गह्य् अथो शक्र परावतः ।
उ लोको यस् ते अद्रिव इन्द्रेह तत आ गहि ॥ ३ ०३७ ११

(२७२)
अभि तष्टेव दीधया मनीषाम् अत्यो न वाजी सुधुरो जिहानः ।
अभि प्रियाणि मर्मृशत् पराणि कवीँर् इच्छामि संदृशे सुमेधाः ॥ ३ ०३८ ०१
इनोत पृच्छ जनिमा कवीनाम् मनोधृतः सुकृतस् तक्षत द्याम् ।

इ॒मा उ॑ ते प्र॒ण्यो॒ ३॒॑ वर्ध॑माना॒ मनो॑वाता॒ अध॒ नु धर्म॑णि ग्मन् ॥ ३ ०३८ ०२
नि षी॒म् इद् अत्र॒ गुह्या॒ दधा॑ना उ॒त क्ष॒त्राय॒ रोद॑सी॒ सम् अ॑ञ्जन् ।
सम् मात्रा॑भिर् ममि॒रे ये॒मुर् उ॒र्वी अ॒न्तर् म॒ही समृ॑ते॒ धाय॑से धुः ॥ ३ ०३८ ०३
आ॒तिष्ठ॑न्तम् परि॒ विश्वे॑ अभूष॒ञ् छ्रियो॒ वसा॑नश् चरति॒ स्वरो॑चिः ।
म॒हत् तद् वृष्णो॒ असु॑रस्य॒ नामा वि॒श्वरू॑पो अ॒मृता॑नि तस्थौ ॥ ३ ०३८ ०४
असू॑त॒ पूर्वो॑ वृष॒भो ज्याया॑न् इ॒मा अ॑स्य शु॒रुधः॑ सन्ति पू॒र्वीः ।
दिवो॑ नपाता वि॒दथ॑स्य धी॒भिः क्ष॒त्रं रा॑जाना प्र॒दिवो॑ दधाथे ॥ ३ ०३८ ०५
त्रीणि॑ राजाना वि॒दथे॑ पु॒रूणि॒ परि॒ विश्वा॑नि भूषथः॒ सदां॑सि ।
अप॑श्यम् अत्र॒ मन॑सा जग॒न्वान् व्र॒ते ग॑न्ध॒र्वाँ अपि॑ वा॒युके॑शान् ॥ ३ ०३८ ०६
तद् इन् न्व् अस्य वृष॒भस्य॑ धे॒नोर् आ नाम॑भिर् ममि॒रे सक्म्यं॒ गोः ।
अ॒न्यद्-अ॑न्यद् असु॒र्यं॒१॒॑ वसा॑ना॒ नि मा॒यिनो॑ ममिरे रू॒पम् अ॑स्मिन् ॥ ३ ०३८ ०७
तद् इन् न्व् अस्य सवि॒तुर् नकि॑र् मे हि॒रण्ययी॑म् अ॒मतिं॒ याम् अशि॑श्रेत् ।
आ सु॑ष्टु॒ती रोद॑सी विश्वमि॒न्वे अपी॑व॒ योषा॒ जनि॑मानि वव्रे ॥ ३ ०३८ ०८
यु॒वम् प्र॒त्नस्य॑ साधथो म॒हो यद् दैवी॑ स्व॒स्तिः परि॑ णः स्यातम् ।
गो॒पाजि॑ह्वस्य त॒स्थुषो॒ विरू॑पा॒ विश्वे॑ पश्यन्ति मा॒यिनः॑ कृ॒तानि॑ ॥ ३ ०३८ ०९
शु॒नं हु॑वेम म॒घवा॑नम् इन्द्र॑म् अ॒स्मिन् भरे॒ नृत॑मं॒ वाज॑सातौ ।
शृ॒ण्वन्त॑म् उ॒ग्रम् ऊ॒तये॑ स॒मत्सु॒ घ्नन्तं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नाम् ॥ ३ ०३८ १०

(२७३)
इन्द्र॑म् म॒तिर् हृ॒द आ व॒च्यमा॒नाच्छा॒ पतिं॒ स्तोम॑तष्टा जिगाति ।
या जागृ॑विर् वि॒दथे॑ श॒स्यमा॒नेन्द्र॒ यत् ते॒ जाय॑ते वि॒द्धि तस्य॑ ॥ ३ ०३९ ०१
दि॒वश् चि॒द् आ पू॒र्व्या जाय॑माना॒ वि जागृ॑विर् वि॒दथे॑ श॒स्यमा॑ना ।
भ॒द्रा वस्त्रा॒ण्य् अर्जु॑ना॒ वसा॑ना॒ सेयम् अ॒स्मे स॑न॒जा पित्र्या॒ धीः ॥ ३ ०३९ ०२
य॒मा चि॒द् अत्र॑ यम॒सूर् अ॑सूत जि॒ह्वाया॒ अग्र॒म् पत॒द् आ ह्य॒ अस्था॑त् ।
वपूं॑षि जा॒ता मि॑थु॒ना स॑चेते तमो॒हना॒ तपु॑षो बु॒ध्न एता॑ ॥ ३ ०३९ ०३
नकि॑र् एषां निन्दि॒ता मर्त्ये॑षु॒ ये अ॒स्माक॑म् पि॒तरो॒ गोषु॑ यो॒धाः ।
इन्द्र॑ एषां दृंहि॒ता माहि॑नावा॒न् उद् गो॒त्राणि॑ ससृजे दं॒सना॑वान् ॥ ३ ०३९ ०४

सखा ह यत्र सखिभिर् नवग्वैर् अभिज्ञ्व् आ सत्वभिर् गा अनुग्मन् ।
सत्यं तद् इन्द्रो दशभिर् दशग्वैः सूर्यं विवेद तमसि क्षियन्तम् ॥ ३ ०३९ ०५
इन्द्रो मधु सम्भृतम् उस्रियायाम् पद्वद् विवेद शफवन् नमे गोः ।
गुहा हितं गुह्यं गूळ्हम् अप्सु हस्ते दधे दक्षिणे दक्षिणावान् ॥ ३ ०३९ ०६
ज्योतिर् वृणीत तमसो विजानन्न् आरे स्याम दुरिताद् अभीके ।
इमा गिरः सोमपाः सोमवृद्ध जुषस्वेन्द्र पुरुतमस्य कारोः ॥ ३ ०३९ ०७
ज्योतिर् यज्ञाय रोदसी अनु ष्याद् आरे स्याम दुरितस्य भूरेः ।
भूरि चिद् धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥ ३ ०३९ ०८
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०३९ ०९

(२७४)
इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे ।
स पाहि मध्वो अन्धसः ॥ ३ ०४० ०१
इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत ।
पिबा वृषस्व तातृपिम् ॥ ३ ०४० ०२
इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर् देवेभिः ।
तिर स्तवान विश्पते ॥ ३ ०४० ०३
इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते ।
क्षयं चन्द्रास इन्दवः ॥ ३ ०४० ०४
दधिष्वा जठरे सुतं सोमम् इन्द्र वरेण्यम् ।
तव द्युक्षास इन्दवः ॥ ३ ०४० ०५
गिर्वणः पाहि नः सुतम् मधोर् धाराभिर् अज्यसे ।
इन्द्र त्वादातम् इद् यशः ॥ ३ ०४० ०६
अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता ।
पीत्वी सोमस्य वावृधे ॥ ३ ०४० ०७
अर्वावतो न आ गहि परावतश् च वृत्रहन् ।

इमा जुषस्व नो गिरः ॥ ३ ०४० ०८
यद् अन्तरा परावतम् अर्वावतं च हूयसे ।
इन्द्रेह तत आ गहि ॥ ३ ०४० ०९

(२७५)
आ तू न इन्द्र मद्र्यग् घुवानः सोमपीतये ।
हरिभ्यां याह्य् अद्रिवः ॥ ३ ०४१ ०१
सत्तो होता न ऋत्वियस् तिस्तिरे बर्हिर् आनुषक् ।
अयुज्रन् प्रातर् अद्रयः ॥ ३ ०४१ ०२
इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद ।
वीहि शूर पुरोळाशम् ॥ ३ ०४१ ०३
रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन् ।
उक्थेष्व् इन्द्र गिर्वणः ॥ ३ ०४१ ०४
मतयः सोमपाम् उरुं रिहन्ति शवसस् पतिम् ।
इन्द्रं वत्सं न मातरः ॥ ३ ०४१ ०५
स मन्दस्वा ह्य् अन्धसो राधसे तन्वा महे ।
न स्तोतारं निदे करः ॥ ३ ०४१ ०६
वयम् इन्द्र त्वायवो हविष्मन्तो जरामहे ।
उत त्वम् अस्मयुर् वसो ॥ ३ ०४१ ०७
मारे अस्मद् वि मुमुचो हरिप्रियार्वाङ् याहि ।
इन्द्र स्वधावो मत्स्वेह ॥ ३ ०४१ ०८
अर्वाञ्चं त्वा सुखे रथे वहताम् इन्द्र केशिना ।
घृतस्नू बर्हिर् आसदे ॥ ३ ०४१ ०९

(२७६)
उप नः सुतम् आ गहि सोमम् इन्द्र गवाशिरम् ।

हरि॑भ्यां॒ यस् ते॑ अस्म॒युः ॥ ३ ०४२ ०१
तम् इ॑न्द्र॒ मद॒म् आ ग॑हि बर्हि॒ष्ठां ग्राव॑भिः सु॒तम् ।
कु॒विन् न्व् अ॑स्य तृ॒प्णवः॑ ॥ ३ ०४२ ०२
इन्द्र॑म् इ॒त्था गिरो॒ ममाच्छा॑गुर् इषि॒ता इ॒तः ।
आ॒वृते॒ सोम॑पीतये ॥ ३ ०४२ ०३
इन्द्रं॒ सोम॑स्य पी॒तये॒ स्तोमै॑र् इ॒ह ह॑वामहे ।
उ॒क्थेभिः॑ कु॒विद् आ॒गम॑त् ॥ ३ ०४२ ०४
इन्द्र॒ सोमाः॑ सु॒ता इ॒मे तान् द॑धिष्व शतक्रतो ।
ज॒ठरे॑ वाजिनीवसो ॥ ३ ०४२ ०५
वि॒द्मा हि त्वा॑ धनंज॒यं वाजे॑षु दधृ॒षं क॑वे ।
अधा॑ ते सु॒म्नम् ई॑महे ॥ ३ ०४२ ०६
इ॒मम् इ॑न्द्र॒ गवा॑शिरं॒ यवा॑शिरं च नः पिब ।
आ॒गत्या॒ वृष॑भिः सु॒तम् ॥ ३ ०४२ ०७
तुभ्येद् इ॑न्द्र॒ स्व ओ॒क्ये॒ ३॑ सोमं॑ चोदामि पी॒तये॑ ।
ए॒ष रा॑रन्तु ते हृ॒दि ॥ ३ ०४२ ०८
त्वां सु॒तस्य॑ पी॒तये॑ प्र॒त्नम् इ॑न्द्र हवामहे ।
कु॒शि॒कासो॑ अव॒स्यवः॑ ॥ ३ ०४२ ०९

(२७७)
आ या॑ह्य् अ॒र्वाङ् उप॑ वन्धुरेष्ठास् तवेद् अनु॑ प्र॒दिवः॑ सोम॒पेय॑म् ।
प्रि॒या सखा॑या॒ वि मु॒चोप॑ ब॒र्हिस् त्वाम् इ॒मे ह॑व्य॒वाहो॑ हवन्ते ॥ ३ ०४३ ०१
आ या॑हि पू॒र्वीर् अति॑ चर्ष॒णीर् आँ अ॒र्य आ॒शिष॒ उप॑ नो॒ हरि॑भ्याम् ।
इ॒मा हि त्वा॑ म॒तय॒ स्तोम॑तष्टा॒ इन्द्र॒ हव॑न्ते स॒ख्यं जु॑षा॒णाः ॥ ३ ०४३ ०२
आ नो॑ य॒ज्ञं न॑मो॒वृधं॑ स॒जोषा॒ इन्द्र॑ देव॒ हरि॑भिर् याहि॒ तूय॑म् ।
अ॒हं हि त्वा॑ म॒तिभि॒र् जोह॑वीमि घृ॒तप्र॑याः सध॒मादे॒ मधू॑नाम् ॥ ३ ०४३ ०३
आ च॒ त्वाम् ए॒ता वृष॑णा॒ वहा॑तो॒ हरी॒ सखा॑या सु॒धुरा॒ स्वङ्गा॑ ।
धा॒नाव॒द् इन्द्रः॒ सव॑नं जुषा॒णः सखा॒ सख्युः॑ शृणव॒द् वन्द॑नानि ॥ ३ ०४३ ०४

कुविन् मा गोपां करसे जनस्य कुविद् राजानम् मघवन्न् ऋजीषिन् ।
कुविन् म ऋषिम् पपिवांसं सुतस्य कुविन् मे वस्वो अमृतस्य शिक्षाः ॥ ३ ०४३ ०५
आ त्वा बृहन्तो हरयो युजाना अर्वाग् इन्द्र सधमादो वहन्तु ।
प्र ये द्विता दिव ऋञ्जन्त्य् आताः सुसम्मृष्टासो वृषभस्य मूराः ॥ ३ ०४३ ०६
इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार ।
यस्य मदे च्यावयसि प्र कृष्टीर् यस्य मदे अप गोत्रा ववर्थ ॥ ३ ०४३ ०७
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०४३ ०८

(२७८)
अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर् न आ गह्य् आ तिष्ठ हरितं रथम् ॥ ३ ०४४ ०१
हर्यन्न् उषसम् अर्चयः सूर्यं हर्यन्न् अरोचयः ।
विद्वांश् चिकित्वान् हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः ॥ ३ ०४४ ०२
द्याम् इन्द्रो हरिधायसम् पृथिवीं हरिवर्पसम् ।
अधारयद् धरितोर् भूरि भोजनं ययोर् अन्तर् हरिश् चरत् ॥ ३ ०४४ ०३
जज्ञानो हरितो वृषा विश्वम् आ भाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुधम् आ वज्रम् बाह्वोर् हरिम् ॥ ३ ०४४ ०४
इन्द्रो हर्यन्तम् अर्जुनं वज्रं शुक्रैर् अभीवृतम् ।
अपावृणोद् धरिभिर् अद्रिभिः सुतम् उद् गा हरिभिर् आजत ॥ ३ ०४४ ०५

(२७९)
आ मन्द्रैर् इन्द्र हरिभिर् याहि मयूररोमभिः ।
मा त्वा के चिन् नि यमन् विं न पाशिनो ऽति धन्वेव ताँ इहि ॥ ३ ०४५ ०१
वृत्रखादो वलंरुजः पुरां दर्मो अपाम् अजः ।
स्थाता रथस्य हर्योर् अभिस्वर इन्द्रो दृळ्हा चिद् आरुजः ॥ ३ ०४५ ०२

गम्भीराँ उदधीर् इव क्रतुम् पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥ ३ ०४५ ०३
आ नस् तुजं रयिम् भरांशं न प्रतिजानते ।
वृक्षम् पक्वम् फलम् अङ्कीव धूनुहीन्द्र सम्पारणं वसु ॥ ३ ०४५ ०४
स्वयुर् इन्द्र स्वराळ् असि स्मद्दिष्टिः स्वयशस्तरः ।
स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः ॥ ३ ०४५ ०५

(२८०)
युध्मस्य ते वृषभस्य स्वराज उग्रस्य यून स्थविरस्य घृष्वेः ।
अजूर्यतो वज्रिणो वीर्या ३ णीन्द्र श्रुतस्य महतो महानि ॥ ३ ०४६ ०१
महाँ असि महिष वृष्ण्येभिर् धनस्पृद् उग्र सहमानो अन्यान् ।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् ॥ ३ ०४६ ०२
प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर् विश्वतो अप्रतीतः ।
प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोर् महो अन्तरिक्षाद् ऋजीषी ॥ ३ ०४६ ०३
उरुं गभीरं जनुषाभ्य् उ १ ग्रं विश्वव्यचसम् अवतम् मतीनाम् ।
इन्द्रं सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशन्ति ॥ ३ ०४६ ०४
यं सोमम् इन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस् त्वाया ।
तं ते हिन्वन्ति तम् उ ते मृजन्त्य् अध्वर्यवो वृषभ पातवा उ ॥ ३ ०४६ ०५

(२८१)
मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोमम् अनुष्वधम् मदाय ।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् ॥ ३ ०४७ ०१
सजोषा इन्द्र सगणो मरुद्भिः सोमम् पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँर् अप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ ३ ०४७ ०२
उत ऋतुभिर् ऋतुपाः पाहि सोमम् इन्द्र देवेभिः सखिभिः सुतं नः ।
याँ आभजो मरुतो ये त्वान्व् अहन् वृत्रम् अदधुस् तुभ्यम् ओजः ॥ ३ ०४७ ०३

ये त्वाहिहत्ये मघवन्न् अवर्धन् ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनम् अनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः ॥ ३ ०४७ ०४
मरुत्वन्तं वृषभं वावृधानम् अकवारिं दिव्यं शासम् इन्द्रम् ।
विश्वासाहम् अवसे नूतनायोग्रं सहोदाम् इह तं हुवेम ॥ ३ ०४७ ०५

(२८२)
सद्यो ह जातो वृषभः कनीनः प्रभर्तुम् आवद् अन्धसः सुतस्य ।
साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥ ३ ०४८ ०१
यज् जायथास् तद् अहर् अस्य कामे ऽंशोः पीयूषम् अपिबो गिरिष्ठाम् ।
तं ते माता परि योषा जनित्री महः पितुर् दम आसिञ्चद् अग्रे ॥ ३ ०४८ ०२
उपस्थाय मातरम् अन्नम् ऐट्ट तिग्मम् अपश्यद् अभि सोमम् ऊधः ।
प्रयावयन्न् अचरद् गृत्सो अन्यान् महानि चक्रे पुरुधप्रतीकः ॥ ३ ०४८ ०३
उग्रस् तुराषाळ् अभिभूत्योजा यथावशं तन्वं चक्र एषः ।
त्वष्टारम् इन्द्रो जनुषाभिभूयामुष्या सोमम् अपिबच् चमूषु ॥ ३ ०४८ ०४
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०४८ ०५

(२८३)
शंसा महाम् इन्द्रं यस्मिन् विश्वा आ कृष्टयः सोमपाः कामम् अव्यन् ।
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः ॥ ३ ०४९ ०१
यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम् ।
इनतमः सत्वभिर् यो ह शूषैः पृथुज्रया अमिनाद् आयुर् दस्योः ॥ ३ ०४९ ०२
सहावा पृत्सु तरणिर् नार्वा व्यानशी रोदसी मेहनावान् ।
भगो न कारे हव्यो मतीनाम् पितेव चारुः सुहवो वयोधाः ॥ ३ ०४९ ०३
धर्ता दिवो रजसस् पृष्ट ऊर्ध्वो रथो न वायुर् वसुभिर् नियुत्वान् ।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम् ॥ ३ ०४९ ०४

शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०४९ ०५

(२८४)
इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान् ।
ओरुव्यचाः पृणताम् एभिर् अन्नैर् आस्य हविस् तन्व १ः कामम् ऋध्याः ॥ ३ ०५०
०१
आ ते सपर्यू जवसे युनज्मि ययोर् अनु प्रदिवः श्रुष्टिम् आवः ।
इह त्वा धेयुर् हरयः सुशिप्र पिबा त्व् अ १स्य सुषुतस्य चारोः ॥ ३ ०५० ०२
गोभिर् मिमिक्षुं दधिरे सुपारम् इन्द्रं ज्यैष्ठ्याय धायसे गृणानाः ।
मन्दानः सोमम् पपिवाँ ऋजीषिन् सम् अस्मभ्यम् पुरुधा गा इषण्य ॥ ३ ०५० ०३
इमं कामम् मन्दया गोभिर् अश्वैश् चन्द्रवता राधसा पप्रथश् च ।
स्वर्यवो मतिभिस् तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥ ३ ०५० ०४
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ३ ०५० ०५

(२८५)
चर्षणीधृतम् मघवानम् उक्थ्य १म् इन्द्रं गिरो बृहतीर् अभ्य् अनूषत ।
वावृधानम् पुरुहूतं सुवृक्तिभिर् अमर्त्यं जरमाणं दिवे-दिवे ॥ ३ ०५१ ०१
शतक्रतुम् अर्णवं शाकिनं नरं गिरो म इन्द्रम् उप यन्ति विश्वतः ।
वाजसनिम् पूर्भिदं तूर्णिम् अप्तुरं धामसाचम् अभिषाचं स्वर्विदम् ॥ ३ ०५१ ०२
आकरे वसोर् जरिता पनस्यते ऽनेहस स्तुभ इन्द्रो दुवस्यति ।
विवस्वतः सदन आ हि पिप्रिये सत्रासाहम् अभिमातिहनं स्तुहि ॥ ३ ०५१ ०३
नृणाम् उ त्वा नृतमं गीर्भिर् उक्थैर् अभि प्र वीरम् अर्चता सबाधः ।
सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे ॥ ३ ०५१ ०४
पूर्वीर् अस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।

इन्द्राय द्याव ओषधीर् उतापो रयिं रक्षन्ति जीरयो वनानि ॥ ३ ०५१ ०५
तुभ्यम् ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।
बोध्य् आ ३ पिर् अवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ॥ ३ ०५१ ०६
इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्न् आ विवासन्ति कवयः सुयज्ञाः ॥ ३ ०५१ ०७
स वावशान इह पाहि सोमम् मरुद्भिर् इन्द्र सखिभिः सुतं नः ।
जातं यत् त्वा परि देवा अभूषन् महे भराय पुरुहूत विश्वे ॥ ३ ०५१ ०८
अप्तूर्ये मरुत आपिर् एषो ऽमन्दन्न् इन्द्रम् अनु दातिवाराः ।
तेभिः साकम् पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे ॥ ३ ०५१ ०९
इदं ह्य् अन्व् ओजसा सुतं राधानाम् पते ।
पिबा त्व् अ १ स्य गिर्वणः ॥ ३ ०५१ १०
यस् ते अनु स्वधाम् असत् सुते नि यच्छ तन्वम् ।
स त्वा ममत्तु सोम्यम् ॥ ३ ०५१ ११
प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।
प्र बाहू शूर राधसे ॥ ३ ०५१ १२

(२८६)
धानावन्तं करम्भिणम् अपूपवन्तम् उक्थिनम् ।
इन्द्र प्रातर् जुषस्व नः ॥ ३ ०५२ ०१
पुरोळाशम् पचत्यं जुषस्वेन्द्रा गुरस्व च ।
तुभ्यं हव्यानि सिस्रते ॥ ३ ०५२ ०२
पुरोळाशं च नो घसो जोषयासे गिरश् च नः ।
वधूयुर् इव योषणाम् ॥ ३ ०५२ ०३
पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः ।
इन्द्र क्रतुर् हि ते बृहन् ॥ ३ ०५२ ०४
माध्यंदिनस्य सवनस्य धानाः पुरोळाशम् इन्द्र कृष्वेह चारुम् ।
प्र यत् स्तोता जरिता तूर्ण्यर्थो वृषायमाण उप गीर्भिर् ईट्टे ॥ ३ ०५२ ०५

तृ॒तीये॑ धा॒नाः सव॑ने पुरुष्टुत पुरो॒ळाश॒म् आहु॑तम् मामहस्व नः ।
ऋ॒भु॒मन्तं॒ वाज॑वन्तं त्वा कवे॒ प्रय॑स्वन्त॒ उप॑ शिक्षेम धी॒तिभिः॑ ॥ ३ ०५२ ०६
पू॒षण्व॑ते ते चकृमा कर॒म्भं हरि॑वते॒ हर्य॑श्वाय धा॒नाः ।
अ॒पू॒पम् अ॑द्धि स॒गणो॑ म॒रुद्भिः॒ सोम॑म् पिब वृत्र॒हा शू॑र वि॒द्वान् ॥ ३ ०५२ ०७
प्रति॑ धा॒ना भ॑रत॒ तूय॑म् अस्मै पुरो॒ळाशं॑ वी॒रत॑माय नृ॒णाम् ।
दि॒वे-दि॑वे स॒दृशी॑र् इन्द्र॒ तुभ्यं॒ वर्ध॑न्तु त्वा सोम॒पेया॑य धृष्णो ॥ ३ ०५२ ०८

(२८७)
इन्द्रा॑पर्वता बृह॒ता रथे॑न वा॒मीर् इष॒ आ व॑हतं सु॒वीराः॑ ।
वी॒तं ह॒व्यान्य् अ॑ध्व॒रेषु॑ देवा॒ वर्धे॑थां गी॒र्भिर् इळ॑या॒ मद॑न्ता ॥ ३ ०५३ ०१
तिष्ठा॒ सु क॑म् मघव॒न् मा परा॑ गाः॒ सोम॑स्य॒ नु त्वा॒ सुषु॑तस्य यक्षि ।
पि॒तुर् न पु॒त्रः सिच॒म् आ र॑भे त॒ इन्द्र॒ स्वादि॑ष्ठया गि॒रा श॑चीवः ॥ ३ ०५३ ०२
शंसा॑वाध्वर्यो॒ प्रति॑ मे गृणी॒हीन्द्रा॑य॒ वाहः॑ कृणवाव॒ जुष्ट॑म् ।
एदम् ब॒र्हिर् यज॑मानस्य सी॒दाथा॑ च भूद् उ॒क्थम् इन्द्रा॑य श॒स्तम् ॥ ३ ०५३ ०३
जा॒येद् अस्त॑म् मघव॒न् सेद् उ॒ योनि॒स् तद् इत् त्वा॑ यु॒क्ता हर॑यो वहन्तु ।
य॒दा क॒दा च॑ सु॒नवा॑म॒ सोम॑म् अ॒ग्निष् ट्वा॑ दू॒तो ध॑न्वात्य् अच्छ॑ ॥ ३ ०५३ ०४
परा॑ याहि मघव॒न्न् आ च॑ या॒हीन्द्र॑ भ्रातर् उभ॒यत्रा॑ ते॒ अर्थ॑म् ।
यत्रा॒ रथ॑स्य बृह॒तो नि॒धानं॑ वि॒मोच॑नं वा॒जिनो॒ रास॑भस्य ॥ ३ ०५३ ०५
अपाः॒ सोम॒म् अस्त॑म् इन्द्र॒ प्र या॑हि कल्या॒णीर् जा॒या सु॒रणं॑ गृ॒हे ते॑ ।
यत्रा॒ रथ॑स्य बृह॒तो नि॒धानं॑ वि॒मोच॑नं वा॒जिनो॒ दक्षि॑णावत् ॥ ३ ०५३ ०६
इ॒मे भो॒जा अङ्गि॑रसो॒ विरू॑पा दि॒वस् पु॒त्रासो॒ असु॑रस्य वी॒राः ।
वि॒श्वामि॑त्राय॒ दद॑तो म॒घानि॑ सहस्रसा॒वे प्र ति॑रन्त॒ आयुः॑ ॥ ३ ०५३ ०७
रू॒पं-रू॑पम् म॒घवा॑ बोभवीति मा॒याः कृ॑ण्वा॒नस् त॒न्व१॒म् परि॒ स्वाम् ।
त्रिर् यद् दि॒वः परि॑ मुहू॒र्तम् आगा॒त् स्वैर् मन्त्रै॒र् अनृ॑तुपा ऋ॒तावा॑ ॥ ३ ०५३ ०८
म॒हाँ ऋषि॑र् देव॒जा दे॒वजू॑तो ऽस्तभ्ना॒त् सिन्धु॑म् अर्ण॒वं नृ॒चक्षाः॑ ।
वि॒श्वामि॑त्रो॒ यद् अव॑हत् सु॒दास॒म् अप्रि॑यायत कुशि॒केभि॒र् इन्द्रः॑ ॥ ३ ०५३ ०९
हं॒सा इ॑व कृणुथ॒ श्लोक॒म् अद्रि॑भि॒र् मद॑न्तो गी॒र्भिर् अ॑ध्व॒रे सु॒ते सचा॑ ।

देवेभिर् विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यम् मधु ॥ ३ ०५३ १०
उप प्रेत कुशिकाश् चेतयध्वम् अश्वं राये प्र मुञ्चता सुदासः ।
राजा वृत्रं जङ्घनत् प्राग् अपाग् उदग् अथा यजाते वर आ पृथिव्याः ॥ ३ ०५३ ११
य इमे रोदसी उभे अहम् इन्द्रम् अतुष्टवम् ।
विश्वामित्रस्य रक्षति ब्रह्मेदम् भारतं जनम् ॥ ३ ०५३ १२
विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे ।
करद् इन् नः सुराधसः ॥ ३ ०५३ १३
किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् ।
आ नो भर प्रमगन्दस्य वेदो नैचाशाखम् मघवन् रन्धया नः ॥ ३ ०५३ १४
ससर्परीर् अमतिम् बाधमाना बृहन् मिमाय जमदग्निदत्ता ।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्व् अमृतम् अजुर्यम् ॥ ३ ०५३ १५
ससर्परीर् अभरत् तूयम् एभ्यो ऽधि श्रवः पाञ्चजन्यासु कृष्टिषु ।
सा पक्ष्या नव्यम् आयुर् दधाना याम् मे पलस्तिजमदग्नयो ददुः ॥ ३ ०५३ १६
स्थिरौ गावौ भवतां वीळुर् अक्षो मेषा वि वर्हि मा युगं वि शारि ।
इन्द्रः पातल्ये ददतां शरीतोर् अरिष्टनेमे अभि नः सचस्व ॥ ३ ०५३ १७
बलं धेहि तनूषु नो बलम् इन्द्रानळुत्सु नः ।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥ ३ ०५३ १८
अभि व्ययस्व खदिरस्य सारम् ओजो धेहि स्पन्दने शिंशपायाम् ।
अक्ष वीळो वीळित वीळयस्व मा यामाद् अस्माद् अव जीहिपो नः ॥ ३ ०५३ १९
अयम् अस्मान् वनस्पतिर् मा च हा मा च रीरिषत् ।
स्वस्त्य् आ गृहेभ्य आवसा आ विमोचनात् ॥ ३ ०५३ २०
इन्द्रोतिभिर् बहुलाभिर् नो अद्य याच्छ्रेष्ठाभिर् मघवञ् छूर जिन्व ।
यो नो द्वेष्ट्य् अधरः सस् पदीष्ट यम् उ द्विष्मस् तम् उ प्राणो जहातु ॥ ३ ०५३ २१
परशुं चिद् वि तपति शिम्बलं चिद् वि वृश्चति ।
उखा चिद् इन्द्र येषन्ती प्रयस्ता फेनम् अस्यति ॥ ३ ०५३ २२
न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः ।
नावाजिनं वाजिना हासयन्ति न गर्दभम् पुरो अश्वान् नयन्ति ॥ ३ ०५३ २३
इम इन्द्र भरतस्य पुत्रा अपपित्वं चिकितुर् न प्रपित्वम् ।

हिन्वन्त्य् अश्वम् अरणं न नित्यं ज्यावाजम् परि णयन्त्य् आजौ ॥ ३ ०५३ २४

(२८८)
इमम् महे विदथ्याय शूषं शश्वत् कृत्व ईड्याय प्र जभ्रुः ।
शृणोतु नो दम्येभिर् अनीकैः शृणोत्व् अग्निर् दिव्यैर् अजस्रः ॥ ३ ०५४ ०१
महि महे दिवे अर्चा पृथिव्यै कामो म इच्छञ् चरति प्रजानन् ।
ययोर् ह स्तोमे विदथेषु देवाः सपर्यवो मादयन्ते सचायोः ॥ ३ ०५४ ०२
युवोर् ऋतं रोदसी सत्यम् अस्तु महे षु णः सुविताय प्र भूतम् ।
इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नम् ॥ ३ ०५४ ०३
उतो हि वाम् पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः ।
नरश् चिद् वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः ॥ ३ ०५४ ०४
को अद्धा वेद क इह प्र वोचद् देवाँ अच्छा पथ्या ३ का सम् एति ।
ददृश्र एषाम् अवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥ ३ ०५४ ०५
कविर् नृचक्षा अभि षीम् अचष्ट ऋतस्य योना विघृते मदन्ती ।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥ ३ ०५४ ०६
समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर् जागरूके ।
उत स्वसारा युवती भवन्ती आद् उ ब्रुवाते मिथुनानि नाम ॥ ३ ०५४ ०७
विश्वेद् एते जनिमा सं विविक्तो महो देवान् बिभ्रती न व्यथेते ।
एजद् ध्रुवम् पत्यते विश्वम् एकं चरत् पतत्रि विषुणं वि जातम् ॥ ३ ०५४ ०८
सना पुराणम् अध्य् एम्य् आरान् महः पितुर् जनितुर् जामि तन् नः ।
देवासो यत्र पनितार एवैर् उरौ पथि व्युते तस्थुर् अन्तः ॥ ३ ०५४ ०९
इमं स्तोमं रोदसी प्र ब्रवीम्य् ऋदूदराः शृणवन्न् अग्निजिह्वाः ।
मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ॥ ३ ०५४ १०
हिरण्यपाणिः सविता सुजिह्वस् त्रिर् आ दिवो विदथे पत्यमानः ।
देवेषु च सवितः श्लोकम् अश्रेर् आद् अस्मभ्यम् आ सुव सर्वतातिम् ॥ ३ ०५४ ११
सुकृत् सुपाणिः स्ववाँ ऋतावा देवस् त्वष्टावसे तानि नो धात् ।
पूषण्वन्त ऋभवो मादयध्वम् ऊर्ध्वग्रावाणो अध्वरम् अतष्ट ॥ ३ ०५४ १२

विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः ।
सरस्वती शृणवन् यज्ञियासो धाता रयिं सहवीरं तुरासः ॥ ३ ०५४ १३
विष्णुं स्तोमासः पुरुदस्मम् अर्का भगस्येव कारिणो यामनि ग्मन् ।
उरुक्रमः ककुहो यस्य पूर्वीर् न मर्धन्ति युवतयो जनित्रीः ॥ ३ ०५४ १४
इन्द्रो विश्वैर् वीर्याइः पत्यमान उभे आ पप्रौ रोदसी महित्वा ।
पुरंदरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरि पश्वः ॥ ३ ०५४ १५
नासत्या मे पितरा बन्धुपृच्छा सजात्यम् अश्विनोश् चारु नाम ।
युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैर् अदब्धा ॥ ३ ०५४ १६
महत् तद् वः कवयश् चारु नाम यद् ध देवा भवथ विश्व इन्द्रे ।
सख ऋभुभिः पुरुहूत प्रियेभिर् इमां धियं सातये तक्षता नः ॥ ३ ०५४ १७
अर्यमा णो अदितिर् यज्ञियासो ऽदब्धानि वरुणस्य व्रतानि ।
युयोत नो अनपत्यानि गन्तोः प्रजावान् नः पशुमाँ अस्तु गातुः ॥ ३ ०५४ १८
देवानां दूतः पुरुध प्रसूतो ऽनागान् नो वोचतु सर्वताता ।
शृणोतु नः पृथिवी द्यौर् उतापः सूर्यो नक्षत्रैर् उर्व् अ १ न्तरिक्षम् ॥ ३ ०५४ १९
शृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः ।
आदित्यैर् नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ॥ ३ ०५४ २०
सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सम् पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद् रायो अश्यां सदनम् पुरुक्षोः ॥ ३ ०५४ २१
स्वदस्व हव्या सम् इषो दिदीह्य् अस्मद्र्य १ क् सम् मिमीहि श्रवांसि ।
विश्वाँ अग्ने पृत्सु ताञ् जेषि शत्रून् अहा विश्वा सुमना दीदिही नः ॥ ३ ०५४ २२

(२८९)
उषसः पूर्वा अध यद् व्यूषुर् महद् वि जज्ञे अक्षरम् पदे गोः ।
व्रता देवानाम् उप नु प्रभूषन् महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०१
मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितरः पदज्ञाः ।
पुराण्योः सद्मनोः केतुर् अन्तर् महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०२
वि मे पुरुत्रा पतयन्ति कामाः शम्य् अच्छा दीद्ये पूर्व्याणि ।

समिद्धे अग्नाव् ऋतम् इद् वदेम महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०३
समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु ।
अन्या वत्सम् भरति क्षेति माता महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०४
आक्षित् पूर्वास्व् अपरा अनूरुत् सद्यो जातासु तरुणीष्व् अन्तः ।
अन्तर्वतीः सुवते अप्रवीता महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०५
शयुः परस्ताद् अध नु द्विमाताबन्धनश् चरति वत्स एकः ।
मित्रस्य ता वरुणस्य व्रतानि महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०६
द्विमाता होता विदथेषु सम्राळ् अन्व् अग्रं चरति क्षेति बुध्नः ।
प्र रण्यानि रण्यवाचो भरन्ते महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०७
शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वम् आयत् ।
अन्तर् मतिश् चरति निष्षिधं गोर् महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०८
नि वेवेति पलितो दूत आस्व् अन्तर् महांश् चरति रोचनेन ।
वपूंषि बिभ्रद् अभि नो वि चष्टे महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ०९
विष्णुर् गोपाः परमम् पाति पाथः प्रिया धामान्य् अमृता दधानः ।
अग्निष् टा विश्वा भुवनानि वेद महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १०
नाना चक्राते यम्या ३ वपूंषि तयोर् अन्यद् रोचते कृष्णम् अन्यत् ।
श्यावी च यद् अरुषी च स्वसारौ महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ ११
माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची ।
ऋतस्य ते सदसीळे अन्तर् महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १२
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुर् ऊधः ।
ऋतस्य सा पयसापिन्वतेळा महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १३
पद्या वस्ते पुरुरूपा वपूंष्य् ऊर्ध्वा तस्थौ त्र्यविं रेरिहाणा ।
ऋतस्य सद्म वि चरामि विद्वान् महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १४
पदे इव निहिते दस्मे अन्तस् तयोर् अन्यद् गुह्यम् आविर् अन्यत् ।
सध्रीचीना पथ्या ३ सा विषूची महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १५
आ धेनवो धुनयन्ताम् अशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः ।
नव्या-नव्या युवतयो भवन्तीर् महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १६
यद् अन्यासु वृषभो रोरवीति सो अन्यस्मिन् यूथे नि दधाति रेतः ।

स हि क्षपावान् स भगः स राजा महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १७
वीरस्य नु स्वश्व्यं जनासः प्र नु वोचाम विदुर् अस्य देवाः ।
षोळ्हा युक्ताः पञ्च-पञ्चा वहन्ति महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १८
देवस् त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान ।
इमा च विश्वा भुवनान्य् अस्य महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ १९
मही सम् ऐरच् चम्वा समीची उभे ते अस्य वसुना न्यृष्टे ।
शृण्वे वीरो विन्दमानो वसूनि महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ २०
इमां च नः पृथिवीं विश्वधाया उप क्षेति हितमित्रो न राजा ।
पुरःसदः शर्मसदो न वीरा महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ २१
निष्षिध्वरीस् त ओषधीर् उतापो रयिं त इन्द्र पृथिवी बिभर्ति ।
सखायस् ते वामभाजः स्याम महद् देवानाम् असुरत्वम् एकम् ॥ ३ ०५५ २२

(२९०)
न ता मिनन्ति मायिनो न धीरा व्रता देवानाम् प्रथमा ध्रुवाणि ।
न रोदसी अद्रुहा वेद्याभिर् न पर्वता निनमे तस्थिवांसः ॥ ३ ०५६ ०१
षड् भारा एको अचरन् बिभर्त्य् ऋतं वर्षिष्ठम् उप गाव आगुः ।
तिस्रो महीर् उपरास् तस्थुर् अत्या गुहा द्वे निहिते दर्श्य् एका ॥ ३ ०५६ ०२
त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।
त्र्यनीकः पत्यते माहिनावान् स रेतोधा वृषभः शश्वतीनाम् ॥ ३ ०५६ ०३
अभीक आसाम् पदवीर् अबोध्य् आदित्यानाम् अह्वे चारु नाम ।
आपश् चिद् अस्मा अरमन्त देवीः पृथग् व्रजन्तीः परि षीम् अवृञ्जन् ॥ ३ ०५६ ०४
त्री षधस्था सिन्धवस् त्रिः कवीनाम् उत त्रिमाता विदथेषु सम्राट् ।
ऋतावरीर् योषणास् तिस्रो अप्यास् त्रिर् आ दिवो विदथे पत्यमानाः ॥ ३ ०५६ ०५
त्रिर् आ दिवः सवितर् वार्याणि दिवे-दिव आ सुव त्रिर् नो अह्नः ।
त्रिधातु राय आ सुवा वसूनि भग त्रातर् धिषणे सातये धाः ॥ ३ ०५६ ०६
त्रिर् आ दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणी ।
आपश् चिद् अस्य रोदसी चिद् उर्वी रत्नम् भिक्षन्त सवितुः सवाय ॥ ३ ०५६ ०७

त्रिर् उत्तमा दूणशा रोचनानि त्रयो राजन्त्य् असुरस्य वीराः ।
ऋतावान इषिरा दूळभासस् त्रिर् आ दिवो विदथे सन्तु देवाः ॥ ३ ०५६ ०८

(२९१)
प्र मे विविक्वाꣳ अविदन् मनीषां धेनुं चरन्तीम् प्रयुताम् अगोपाम् ।
सद्यश् चिद् या दुदुहे भूरि धासेर् इन्द्रस् तद् अग्निः पनितारो अस्याः ॥ ३ ०५७ ०१
इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे ।
विश्वे यद् अस्यां रणयन्त देवाः प्र वो ऽत्र वसवः सुम्नम् अश्याम् ॥ ३ ०५७ ०२
या जामयो वृष्ण इच्छन्ति शक्तिं नमस्यन्तीर् जानते गर्भम् अस्मिन् ।
अच्छा पुत्रं धेनवो वावशाना महश् चरन्ति बिभ्रतं वपूंषि ॥ ३ ०५७ ०३
अच्छा विवक्मि रोदसी सुमेके ग्राव्णो युजानो अध्वरे मनीषा ।
इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवन्ति दर्शता यजत्राः ॥ ३ ०५७ ०४
या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची ।
तयेह विश्वाꣳ अवसे यजत्रान् आ सादय पायया चा मधूनि ॥ ३ ०५७ ०५
या ते अग्ने पर्वतस्येव धारासश्चन्ती पीपयद् देव चित्रा ।
ताम् अस्मभ्यम् प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्याम् ॥ ३ ०५७ ०६

(२९२)
धेनुः प्रत्नस्य काम्यं दुहानान्तः पुत्रश् चरति दक्षिणायाः ।
आ द्योतनिं वहति शुभ्रयामोषस स्तोमो अश्विनाव् अजीगः ॥ ३ ०५८ ०१
सुयुग् वहन्ति प्रति वाम् ऋतेनोर्ध्वा भवन्ति पितरेव मेधाः ।
जरेथाम् अस्मद् वि पणेर् मनीषां युवोर् अवश् चकृमा यातम् अर्वाक् ॥ ३ ०५८ ०२
सुयुग्भिर् अश्वैः सुवृता रथेन दस्राव् इमं शृणुतं श्लोकम् अद्रेः ।
किम् अङ्ग वाम् प्रत्य् अवर्तिं गमिष्ठाहुर् विप्रासो अश्विना पुराजाः ॥ ३ ०५८ ०३
आ मन्येथाम् आ गतं कच् चिद् एवैर् विश्वे जनासो अश्विना हवन्ते ।
इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुर् उस्रो अग्रे ॥ ३ ०५८ ०४

तिरः पुरू चिद् अश्विना रजांस्य् आङ्गूषो वाम् मघवाना जनेषु ।
एह यातम् पथिभिर् देवयानैर् दस्राव् इमे वां निधयो मधूनाम् ॥ ३ ०५८ ०५
पुराणम् ओकः सख्यं शिवं वां युवोर् नरा द्रविणं जह्नाव्याम् ।
पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः ॥ ३ ०५८ ०६
अश्विना वायुना युवं सुदक्षा नियुद्भिष् च सजोषसा युवाना ।
नासत्या तिरोअह्न्यं जुषाणा सोमम् पिबतम् अस्रिधा सुदानू ॥ ३ ०५८ ०७
अश्विना परि वाम् इषः पुरूचीर् ईयुर् गीर्भिर् यतमाना अमृध्राः ।
रथो ह वाम् ऋतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥ ३ ०५८ ०८
अश्विना मधुषुत्तमो युवाकुः सोमस् तम् पातम् आ गतं दुरोणे ।
रथो ह वाम् भूरि वर्पः करिक्रत् सुतावतो निष्कृतम् आगमिष्ठः ॥ ३ ०५८ ०९

(२९३)
मित्रो जनान् यातयति ब्रुवाणो मित्रो दाधार पृथिवीम् उत द्याम् ।
मित्रः कृष्टीर् अनिमिषाभि चष्टे मित्राय हव्यं घृतवज् जुहोत ॥ ३ ०५९ ०१
प्र स मित्र मर्तो अस्तु प्रयस्वान् यस् त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनम् अंहो अश्नोत्य् अन्तितो न दूरात् ॥ ३ ०५९ ०२
अनमीवास इळया मदन्तो मितज्ञवो वरिमन्न् आ पृथिव्याः ।
आदित्यस्य व्रतम् उपक्षियन्तो वयम् मित्रस्य सुमतौ स्याम ॥ ३ ०५९ ०३
अयम् मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ३ ०५९ ०४
महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः ।
तस्मा एतत् पन्यतमाय जुष्टम् अग्नौ मित्राय हविर् आ जुहोत ॥ ३ ०५९ ०५
मित्रस्य चर्षणीधृतो ऽवो देवस्य सानसि ।
द्युम्नं चित्रश्रवस्तमम् ॥ ३ ०५९ ०६
अभि यो महिना दिवम् मित्रो बभूव सप्रथाः ।
अभि श्रवोभिः पृथिवीम् ॥ ३ ०५९ ०७
मित्राय पञ्च येमिरे जना अभिष्टिशवसे ।

स दे॒वान् विश्वा॑न् बिभर्ति ॥ ३ ०५९ ०८
मि॒त्रो दे॒वेष्व् आ॒युषु॒ जना॑य वृ॒क्तब॑र्हिषे ।
इष॑ इ॒ष्टव्र॑ता अकः ॥ ३ ०५९ ०९

(२१४)
इ॒हेह॑ वो॒ मन॑सा ब॒न्धुता॑ नर उ॒शिजो॑ जग्मुर् अ॒भि तानि॒ वेद॑सा ।
याभि॑र् मा॒याभिः॒ प्रति॑जूतिवर्पसः॒ सौध॑न्वना य॒ज्ञिय॑म् भा॒गम् आ॑न॒श ॥ ३ ०६० ०१
याभिः॒ शची॑भिश् चम॒साँ अपिं॑शत॒ यया॑ धि॒या गाम् अरि॑णीत॒ चर्म॑णः ।
येन॒ हरी॒ मन॑सा नि॒रत॑क्षत॒ तेन॑ दे॒वत्वम् ऋ॑भवः॒ सम् आ॑नश ॥ ३ ०६० ०२
इन्द्र॑स्य स॒ख्यम् ऋ॒भवः॒ सम् आ॑नशु॒र् मनो॒र् नपा॑तो अ॒पसो॑ दधन्विरे ।
सौ॒ध॒न्व॒नासो॑ अमृ॒तत्वम् एरि॑रे वि॒ष्ट्वी शमी॑भिः सु॒कृतः॑ सुकृ॒त्यया॑ ॥ ३ ०६० ०३
इन्द्रे॑ण याथ स॒रथं॑ सु॒ते सचा॒ँ अथो॒ वशा॑नाम् भवथा स॒ह श्रि॒या ।
न वः॑ प्रति॒मै सु॑कृ॒तानि॑ वाघतः॒ सौध॑न्वना ऋभवो वी॒र्या॑णि च ॥ ३ ०६० ०४
इन्द्र॑ ऋ॒भुभि॑र् वाज॑वद्भिः॒ समु॑क्षितं सु॒तं सोम॒म् आ वृ॑षस्वा॒ गभ॑स्त्योः ।
धि॒येषि॒तो म॑घवन् दा॒शुषो॑ गृ॒हे सौ॑धन्व॒नेभिः॑ स॒ह म॑त्स्वा॒ नृभिः॑ ॥ ३ ०६० ०५
इन्द्र॑ ऋभु॒मान् वाज॑वान् मत्स्वे॒ह नो॑ ऽस्मि॒न् सव॑ने॒ शच्या॑ पुरुष्टुत ।
इ॒मानि॒ तुभ्यं॒ स्वस॑राणि येमिरे व्र॒ता दे॒वाना॒म् मनु॑षश् च॒ धर्म॑भिः ॥ ३ ०६० ०६
इन्द्र॑ ऋ॒भुभि॑र् वा॒जिभि॑र् वा॒जय॑न्न् इ॒ह स्तोमं॑ जरि॒तुर् उप॑ याहि य॒ज्ञिय॑म् ।
श॒तं केते॑भिर् इषि॒रेभि॑र् आ॒यवे॑ स॒हस्र॑णीथो अध्व॒रस्य॒ होम॑नि ॥ ३ ०६० ०७

(२१५)
उषो॒ वाजे॑न वाजिनि॒ प्रचे॑ता॒ स्तोमं॑ जुषस्व गृण॒तो म॑घोनि ।
पु॒रा॒णी दे॑वि यु॒वतिः पुरं॑धि॒र् अनु॑ व्र॒तं च॑रसि विश्ववारे ॥ ३ ०६१ ०१
उषो॑ दे॒व्य् अम॑र्त्या॒ वि भा॑हि च॒न्द्रर॑था सू॒नृता॑ ई॒रय॑न्ती ।
आ त्वा॑ वहन्तु सु॒यमा॑सो॒ अश्वा॒ हिर॑ण्यवर्णाम् पृथु॒पाज॑सो॒ ये ॥ ३ ०६१ ०२
उषः॑ प्रती॒ची भुव॑नानि॒ विश्वो॒र्ध्वा ति॑ष्ठस्य् अ॒मृत॑स्य के॒तुः ।

समानम् अर्थं चरणीयमाना चक्रम् इव नव्यस्य् आ ववृत्स्व ॥ ३ ०६१ ०३
अव स्यूमेव चिन्वती मघोन्य् उषा याति स्वसरस्य पत्नी ।
स्व १ र् जनन्ती सुभगा सुदंसा आन्ताद् दिवः पप्रथ आ पृथिव्याः ॥ ३ ०६१ ०४
अच्छा वो देवीम् उषसं विभातीम् प्र वो भरध्वं नमसा सुवृक्तिम् ।
ऊर्ध्वम् मधुधा दिवि पाजो अश्रेत् प्र रोचना रुरुचे रण्वसंदृक् ॥ ३ ०६१ ०५
ऋतावरी दिवो अर्कैर् अबोध्य् आ रेवती रोदसी चित्रम् अस्थात् ।
आयतीम् अग्न उषसं विभातीं वामम् एषि द्रविणम् भिक्षमाणः ॥ ३ ०६१ ०६
ऋतस्य बुध्न उषसाम् इषण्यन् वृषा मही रोदसी आ विवेश ।
मही मित्रस्य वरुणस्य माया चन्द्रेव भानुं वि दधे पुरुत्रा ॥ ३ ०६१ ०७

(२९६)
इमा उ वाम् भृमयो मन्यमाना युवावते न तुज्या अभूवन् ।
क्व १ त्यद् इन्द्रावरुणा यशो वां येन स्मा सिनम् भरथः सखिभ्यः ॥ ३ ०६२ ०१
अयम् उ वाम् पुरुतमो रयीयञ् छश्वत्तमम् अवसे जोहवीति ।
सजोषाव् इन्द्रावरुणा मरुद्भिर् दिवा पृथिव्या शृणुतं हवम् मे ॥ ३ ०६२ ०२
अस्मे तद् इन्द्रावरुणा वसु ष्याद् अस्मे रयिर् मरुतः सर्ववीरः ।
अस्मान् वरूत्रीः शरणैर् अवन्त्व् अस्मान् होत्रा भारती दक्षिणाभिः ॥ ३ ०६२ ०३
बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य ।
रास्व रत्नानि दाशुषे ॥ ३ ०६२ ०४
शुचिम् अर्कैर् बृहस्पतिम् अध्वरेषु नमस्यत ।
अनाम्य् ओज आ चके ॥ ३ ०६२ ०५
वृषभं चर्षणीनां विश्वरूपम् अदाभ्यम् ।
बृहस्पतिं वरेण्यम् ॥ ३ ०६२ ०६
इयं ते पूषन्न् आघृणे सुष्टुतिर् देव नव्यसी ।
अस्माभिस् तुभ्यं शस्यते ॥ ३ ०६२ ०७
तां जुषस्व गिरम् मम वाजयन्तीम् अवा धियम् ।
वधूयुर् इव योषणाम् ॥ ३ ०६२ ०८

यो विश्वाभि विपश्यति भुवना सं च पश्यति ।
स नः पूषाविता भुवत् ॥ ३ ०६२ ०९
तत् सवितुर् वरेण्यम् भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥ ३ ०६२ १०
देवस्य सवितुर् वयं वाजयन्तः पुरंध्या ।
भगस्य रातिम् ईमहे ॥ ३ ०६२ ११
देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः ।
नमस्यन्ति धियेषिताः ॥ ३ ०६२ १२
सोमो जिगाति गातुविद् देवानाम् एति निष्कृतम् ।
ऋतस्य योनिम् आसदम् ॥ ३ ०६२ १३
सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे ।
अनमीवा इषस् करत् ॥ ३ ०६२ १४
अस्माकम् आयुर् वर्धयन्न् अभिमातीः सहमानः ।
सोमः सधस्थम् आसदत् ॥ ३ ०६२ १५
आ नो मित्रावरुणा घृतैर् गव्यूतिम् उक्षतम् ।
मध्वा रजांसि सुक्रतू ॥ ३ ०६२ १६
उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः ।
द्राघिष्ठाभिः शुचिव्रता ॥ ३ ०६२ १७
गृणाना जमदग्निना योनाव् ऋतस्य सीदतम् ।
पातं सोमम् ऋतावृधा ॥ ३ ०६२ १८